श्री स्वामिनारायणो विजयतेतराम्

# મહાપૂજા




-: પ્રકાશક :-

## શ્રી સ્વામિનારાયણ મંદિર, ભુજ-કચ્છ.

।। श्री स्वामिनारायणो विजयतेतराम् ।।

અ.નિ. જ્યોતિષજ્ઞ સ.ગુ. પુરાણી સ્વામી કેશવપ્રસાદદાસજીના
સર્વમંગલ સ્મૃતિ મહોત્સવના ઉપલક્ષમાં

# महापूजा

पुराणोक्तयज्ञोपवीतविधिना सहिता

:: आज्ञा ::

प.पू.ध.धू. १००८ आचार्य महाराजश्री कौशलेन्द्रप्रसादजी

:: प्रसिध्ध कर्ता ::

महंत स.गु.पु. स्वामी धर्मनंदनदासजी

:: संशोधक ::

पुराणी स्वामी ईश्वरस्वरूपदासजी

:: प्रकाशक ::

श्री स्वामिनारायण मंदिर, भुज-कच्छ.

संवत्-२०६४
अधिक जेठ वद-७
पुरूषोत्तम मास

इ.स. ६-६-२०१८
बुधवार


શ્રી સ્વામિનારાયણ ભગવાન.

॥ श्रीस्वामिनारायणो विजयतेतराम् ॥

# अथ महापूजा प्रयोगः कथ्यते

तत्रादौ ब्राह्मे मुहूर्ते उत्थाय भगवद्भक्त स्मरणं कृत्वा शौचदन्तधावन - स्नानादिकं नित्यकर्म च कृत्वा पूर्वोक्तलक्षणः पूजकः आदौ सर्वान् पूजोपहारान् सम्पाद्य...

आत्मानात्मविवेकेन भूतशुद्धिं विधाय सः ।
देहादिभ्यः पृथग्भूत्वा भवेदात्मस्वरूपकः ॥१॥

इति भूतशुद्धिं विधाय गोमयादिना संशोधिते भूप्रदेशे

પૃથ્વીદેવીને નમસ્કાર કરતા આવજો.

( १ ) ॐ वाराहाय नमः
( २ ) कूर्माय नमः
( ३ ) ॐ शेषाय नमः
( ४ ) ॐ पृथिव्यै नमः

इति सम्पूज्य कूर्मपृष्टोपरि स्थितां शुक्लवर्णां पद्म-शङ्ख-चक्र-शूलहस्तां प्रसन्नाननां भूमिं ध्यात्वा....

પૃથ્વીદેવીને પ્રાર્થના કરજો.

आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ।
पृथिवि ब्रह्मदत्तासि कश्यपेनाभिवन्दिता ॥२॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
दंष्ट्राग्रे लीलया देवि ! पूजार्थं प्रणमाम्यहम् ॥३॥

इति नमस्कृत्य ततः कम्बलाद्यासनमास्तीर्य ततः

હાથમાં ચોખા લેજો.

पृथिवीति मन्त्रस्य । मेरुपृष्ठ ऋषिः । कूर्मो देवता । सूतलं छन्दः । आसने विनियोगः।

તમારા આસન ઉપર ચોખાના બે દાણા મૂકજો.

पृथ्वी त्वया धृता लोका देवि ! त्वं विष्णुना धृता ।
त्वञ्च धारय मां देवि ! पवित्रं कुरु चासनम् ॥४॥

તમારા આસન નીચે ચોખાના બે દાણા મૂકજો.

इत्यासनं सम्पूज्य प्राङ्मुखम् उदङ्मुखं वा उपविश्य आचम्य प्राणानायम्य तत्रादौ गणपतिस्मरणं कृत्वा पूजनं कुर्यात्..

હાથ જોડીને ગણપતિનું સ્મરણ કરજો.

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥१॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥२॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विध्नस्तस्य न जायते ॥३॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥४॥

इति श्रीमन्महागणाधिपतये नमः । ध्यानं समर्पयामि ।

## अथ गणपतिपूजनम् ।

तत आसनं समर्पयामि ચોખાના દાણા મૂકજો. पादयोः पाद्यं समर्पयामि । हस्तयोरर्घ्यं समर्पयामि । मुखे आचमनीयं समर्पयामि । वरुणस्नानं समर्पयामि । पञ्चामृतस्नानं समर्पयामि । शुद्धोदकस्नानं समर्पयामि । वस्त्रोपवस्त्रं समर्पयामि । यज्ञोपवीतं समर्पयामि । चन्दनं समर्पयामि । अक्षतान् समर्पयामि । पुष्पाणि समर्पयामि । दुर्वाङ्कुरान् समर्पयामि । अबीरं समर्पयामि । गुलालं समर्पयामि । कुङ्कुमं समर्पयामि । सिन्दुरं समर्पयामि । पीतचूर्णं समर्पयामि । धूपं समर्पयामि । दीपं समर्पयामि । नैवेद्यं समर्पयामि । પાંચ વખત પાણીની ચમચી मध्ये पानीयं समर्पयामि । उत्तरापोशनं समर्पयामि । हस्तप्रक्षालनं समर्पयामि । मुखप्रक्षालनं समर्पयामि । आचमनीयं समर्पयामि । फलं समर्पयामि । ताम्बुलं समर्पयामि । दक्षिणां समर्पयामि । नीराजनं समर्पयामि । प्रदक्षिणां समर्पयामि ।

पुष्पाञ्जलिं प्रकल्पयेत्...હાથમાં ફૂલ લેજો.

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥५॥

इति नमस्कारान् (ફૂલ અર્પણ કરી, બે હાથ જોડી પ્રાર્થના કરવી.)

॥ ततः गणपतिप्रार्थना ॥

रक्ष रक्ष गणाध्यक्ष ! रक्ष त्रैलोक्यरक्षकः ।
भक्तानामभयं कर्ता त्राता भवभवार्णवात् ॥ ६ ॥ इति प्रार्थना ।

अनेन मत्कृतेन श्रीमन्महागणपतिपूजनेन श्रीहरिः प्रीयताम् ।

ततः शिवादीनां स्मरणं कुर्यात् ।

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि ! नारायणि ! नमोऽस्तु ते ॥७॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः ॥८॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंऽघ्रियुगं स्मरामि ॥९॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥१०॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥११॥
आपदामपि हर्तारं दातारं सर्वसम्पदाम् ।
भक्तिधर्मात्मजं कृष्णं भूयो भूयो नमाम्यहम् ॥ १२ ॥

બે હાથ જોડી નમસ્કાર કરજો.

ॐ श्रीहरिकृष्णाय नमः ॐ लक्ष्मीनारायणाभ्यां नमः
ॐ उमामहेश्वराभ्यां नमः ॐ शचीपुरन्दराभ्यां नमः

ॐ गुरुभ्यो नमः
ॐ मुनिमण्डलेभ्यो नमः
ॐ भक्तमण्डलेभ्यो नमः
ॐ मातापितृभ्यां नमः
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः
ॐ सर्वेभ्यो देवेभ्यो नमः

शान्तिरस्तु शिवञ्चास्तु दुष्टमस्य प्रशाम्यतु ।
यत् किंचिदस्मद्दुरितं तत् क्षिप्तंलवणाम्भसि ॥ १३ ॥

(સંકલ્પ - જમણા હાથમાં પાણી, ચોખા, ચંદન, પુષ્પ લઈ ડાબા હાથથી ઢાંકી દેજો.)

आयातोपकल्पित श्रीहरिकृष्णभगवत्पूजनीयोपहाराणां सर्वेषां पवित्रतास्तु, देश-काल-पाक-पात्र-द्रव्य-श्रद्धा सम्पदस्तु

ततो दक्षिणहस्ते साक्षतजलमादाय

ॐ श्रीविष्णुर्विष्णुर्विष्णुः ।

ॐ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके जम्बुद्विपे भारतवर्षे आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे कुमारिकानाम्निक्षेत्रे કચ્છ દેશે ભુજંગનગરે હમીરસરદક્ષિણતટે સ્વામિનારાયણ મંદિરે देव-બ્રાહ્મણ-સાધ્વાદીનાં सन्निधौ अत्राद्य महामाङ्गल्यप्रदे विक्रमसंवत् દ્વિસહસ્ત્રાબ્દિકે ચતુઃસપ્તતિતમે અબ્દે ( उतरायणे/दक्षिणायने ) गते श्रीमन्मार्तण्डमण्डले मासोत्तममासे कार्तिकमासे ( शुक्ल/कृष्णा ) पक्षे इन्दु वासरे एकादशी तिथौ शुभनक्षत्रे शुभयोगे शुभकरणे शुभलग्ने शुभराशिस्थिते श्रीसूर्ये शुभराशिस्थिते श्रीचन्द्रे शेषेषु ग्रहेषु यथाराशिवर्तमानेषु सत्सु एवं ग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ कश्यप गोत्रे मम एकान्तिकधर्मसिद्धये चेप्सितफलप्राप्त्यर्थं साङ्गसपरिवार श्रीहरिकृष्णभगवदावाहनस्थापनप्रतिष्ठादिमहापूजां करिष्ये ।

इति सङ्कल्पः પાણી નીચે મુકી દ્યો.

॥ अथ पीठपूजनम् ॥ બાજોઠનું પૂજન કરવું.

अथाग्रे सिंहाकाराष्टपादं चतुष्पादं वा पीठं संस्थाप्य तदुपरि सर्वतो भद्रमण्डलं विरच्य ततस्तस्मिन् पीठे पीठाधिदेवाक्षरपुरुषाय नमः इति अक्षरपुरुषं गन्धादिना सम्पूज्य तदुपरि श्वेतवाससा सभां प्रकल्प्य तन्मध्ये तण्डुलैर्वा कुङ्कुमादिभिः सकेसरोज्ज्वलकर्णिकामष्टदलं पद्मं कुर्वीत तन्मध्ये काञ्चनमयीं प्रतिमां अग्न्युत्तारणपूर्वकं निधाय यथा...

वह्निसम्बन्धलौहासत्स्पर्शघट्टनदोषतः ।
मूर्तिः शुद्धा भवत्येषा हरेरावाहनाय वै ॥ १ ॥

(આવાહન-સ્થાપન વિધિ - ડાબા હાથમાં ચોખા લઈ જમણા હાથથી બબે દાણા મુકવા.) (મહારાજનું આવાહન-સ્થાપન)

अनेनाग्न्युत्तारणपूर्वकं सुवर्णप्रतिमां निधाय तस्यां मूलेन

ॐ घनश्याम द्विभुजपद्मपत्राक्षसिताम्बरावतारि दक्षवामस्थ भक्तिधर्मान्वितश्रीहरिकृष्णभगवते नमः एतद्विशेषेणविशिष्टं श्रीहरिकृष्णभगवन्तम् आवाहयामि स्थापयामि ॥१॥

अथ तदङ्गदेवान् सुवर्णप्रतिमासु क्रमुकफलाक्षतपुञ्जेषु वा यथासम्पत् तन्नाममन्त्रेण स्थापयेत् यथा

तत्पृष्ठे ॐ छत्रधारिणे रामप्रतापाय नमः तम् आवाहयामि स्थापयामि ॥२॥

तत्रैव ॐ सौम्याङ्करात्ततालवृन्तकेच्छारामाय नमः तम् आवाहयामि स्थापयामि ॥३॥

ॐ श्रीहरिदक्षपार्श्वे गृहीतचामर अयोध्याप्रसादाय नमः तम् आवाहयामि स्थापयामि ॥४॥

ॐ श्रीहरिवामपार्श्वे गृहीतचामररघुवीराय नमः तम् आवाहयामि स्थापयामि॥५॥

ततोऽष्टकेसरेषु पूर्वाऽग्नेयादिक्रमेण एतान् षोडशसद्गुरून्
एकैकस्मिन् केसरे द्वौ द्वौ स्थापयेत् यथा :-

ॐ मुकुन्दानन्दवर्णीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥१॥

ॐ जयानन्दवर्णीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥२॥

ॐ मुक्तानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥३॥

ॐ गोपालानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥४॥

ॐ ब्रह्मानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥५॥

ॐ नित्यानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥६॥

ॐ व्यापकानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥७॥

ॐ स्वरूपानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥८॥

ॐ कृपानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥९॥

ॐ आनन्दानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥१०॥

ॐ चैतन्यानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥११॥

ॐ परमानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥१२॥

ॐ अखण्डानन्दवर्णीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥१३॥

ॐ वासुदेवानन्दवर्णीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥१४॥

ॐ महानुभावानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥१५॥

ॐ शुकानन्दमुनीन्द्राय नमः तम् आवाहयामि स्थापयामि ॥१६॥

तत आग्नेयादिक्रमेण चतुःकेसराग्रेषु इमान् मुनीन्द्रान्
स्थापयेत् यथा :-

अग्निकोणे ॐ धर्ममूर्तये आत्मानन्दमुनीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥१॥

नैरृतकोणे ॐ ज्ञानमूर्तये स्वयम्प्रकाशानन्दमुनीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥२॥

वायुकोणे ॐ वैराग्यमूर्तये निष्कुलानन्दमुनीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥३॥

ईशानकोणे ॐ ऐश्वर्यमूर्तये सच्चिदानन्दमुनीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥४॥

**ततः केसरान्तरालेषु इमान् अवतारान् पूर्वाग्नेयादि क्रमेण द्वौ द्वौ स्थापयेत् यथा :-**

ॐ यज्ञाय नमः तम् आवाहयामि स्थापयामि ॥१॥

ॐ उपेन्द्राय नमः तम् आवाहयामि स्थापयामि ॥२॥

ॐ बुद्धाय नमः तम् आवाहयामि स्थापयामि ॥३॥

ॐ ऋषभाय नमः तम् आवाहयामि स्थापयामि ॥४॥

ॐ दत्तात्रेयाय नमः तम् आवाहयामि स्थापयामि ॥५॥

ॐ कपिलाय नमः तम् आवाहयामि स्थापयामि ॥६॥

ॐ मत्स्याय नमः तम् आवाहयामि स्थापयामि ॥७॥

ॐ कूर्माय नमः तम् आवाहयामि स्थापयामि ॥८॥

ॐ वाराहाय नमः तम् आवाहयामि स्थापयामि ॥९॥

ॐ नृसिंहाय नमः तम् आवाहयामि स्थापयामि ॥१०॥

ॐ व्यासाय नमः तम् आवाहयामि स्थापयामि ॥११॥

ॐ गजाननाय नमः तम् आवाहयामि स्थापयामि ॥१२॥

ॐ श्रीरामानन्दस्वामिने नमः तम् आवाहयामि स्थापयामि ॥१३॥

ॐ हंसाय नमः तम् आवाहयामि स्थापयामि ॥१४॥

ॐ परशुरामाय नमः तम् आवाहयामि स्थापयामि ॥१५॥

ॐ कल्किने नमः तम् आवाहयामि स्थापयामि ॥१६॥

ततोऽष्टदलेषु पूर्वाग्नेयादि क्रमेण द्वौ द्वौ पार्षदान् स्थापयेत् यथा -

ॐ उत्तमाय नमः तम् आवाहयामि स्थापयामि ॥१॥
ॐ हेमन्तसिंहाय नमः तम् आवाहयामि स्थापयामि ॥२॥
ॐ सोमाय नमः तम् आवाहयामि स्थापयामि ॥३॥
ॐ सूराय नमः तम् आवाहयामि स्थापयामि ॥४॥
ॐ भृगुजिते नमः तम् आवाहयामि स्थापयामि ॥५॥
ॐ रत्नजिते नमः तम् आवाहयामि स्थापयामि ॥६॥
ॐ नाञ्जाय नमः तम् आवाहयामि स्थापयामि ॥७॥
ॐ अलयाय नमः तम् आवाहयामि स्थापयामि ॥८॥
ॐ नान्नाय नमः तम् आवाहयामि स्थापयामि ॥९॥
ॐ माणक्यै नमः ताम् आवाहयामि स्थापयामि ॥१०॥
ॐ लक्षाय नमः तम् आवाहयामि स्थापयामि ॥११॥
ॐ गालवाय नमः तम् आवाहयामि स्थापयामि ॥१२॥
ॐ कुबेरसिंहाय नमः तम् आवाहयामि स्थापयामि ॥१३॥
ॐ मानसिंहाय नमः तम् आवाहयामि स्थापयामि ॥१४॥
ॐ भीमाय नमः तम् आवाहयामि स्थापयामि ॥१५॥
ॐ अर्जुनाय नमः तम् आवाहयामि स्थापयामि ॥१६॥

ततो दलान्तरेषु हरिगायकान् पूर्वाग्नेयादिक्रमेण द्वौ द्वौ स्थापयेत् यथा

ॐ प्रेमानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥ १ ॥
ॐ देवानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥ २ ॥
ॐ ज्ञानानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥ ३ ॥
ॐ गुणातीतानन्दमुनये नमः तम् आवाहयामि स्थापयामि ४ ॥
ॐ योगानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥ ५ ॥
ॐ प्रज्ञानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥ ६ ॥

ॐ गोविन्दानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥७॥

ॐ त्यागानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥८॥

ॐ विरक्तानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥९॥

ॐ आधारानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥१०॥

ॐ निरञ्जनानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥११॥

ॐ अभेदानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥१२॥

ॐ निर्गुणानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥१३॥

ॐ भूधरानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥१४॥

ॐ सुखानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥१५॥

ॐ विज्ञानानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥१६॥

ततो दलाग्रेषु पूर्वादिदिक्षु वैदिकान् आग्नेयादि विदिक्षु शास्त्रिणश्च स्थापयेत् यथाः-

ॐ ऋग्वेदधारिणे नारायणानन्दवर्णीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥१॥

ॐ यजुर्वेदधारिणे आनन्दानन्दवर्णीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥२॥

ॐ सामवेदधारिणे गोपालानन्दवर्णीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥३॥

ॐ अथर्ववेदधारिणे वैकुण्ठानन्दवर्णीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥४॥

ॐ अग्निकोणे धर्मशास्त्रधारिणे शतानन्दमुनीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥५॥

ॐ योगशास्त्रधारिणे योगानन्दमुनीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥६॥

ॐ सांख्यशास्त्रधारिणे भगवदानन्दमुनीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥७॥

ॐ पञ्चरात्रशास्त्रधारिणे शिवानन्दमुनीन्द्राय नमः
तम् आवाहयामि स्थापयामि ॥८॥

ततोऽष्टदलान्तरालेषु हरिस्तोत्रपाठकान् मुनीन् पूर्वाग्नेयादिक्रमेण स्थापयेत् यथा

ॐ कृष्णानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥१॥

ॐ अक्षरानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥२॥

ॐ सर्वज्ञानानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥३॥

ॐ अद्भुतानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥४॥

ॐ शून्यातीतानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥५॥

ॐ तद्रूपानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥६॥

ॐ शान्तानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥७॥

ॐ पुरुषानन्दमुनये नमः तम् आवाहयामि स्थापयामि ॥८॥

ततः पश्चाद्बहिः ब्रह्मर्षीन् पूर्वाग्नेयादि अनुक्रमेण स्थापयेत् यथा

ॐ मयारामाय नमः तम् आवाहयामि स्थापयामि ॥१॥

ॐ प्राणगोविन्दाय नमः तम् आवाहयामि स्थापयामि ॥२॥

ॐ लक्ष्मीरामाय नमः तम् आवाहयामि स्थापयामि ॥३॥

ॐ हेमन्तरामाय नमः तम् आवाहयामि स्थापयामि ॥४॥

ॐ शिवयाज्ञिकाय नमः तम् आवाहयामि स्थापयामि ॥५॥

ॐ मोहनरामाय नमः तम् आवाहयामि स्थापयामि ॥ ६ ॥

ॐ हरिशर्मणे नमः तम् आवाहयामि स्थापयामि ॥ ७ ॥

ॐ कृपाशंकराय नमः तम् आवाहयामि स्थापयामि ॥ ८ ॥

ततः पद्माद्बहिः ब्रह्मर्षीणां समीपे भक्तेन्द्रान् पूर्वाग्नेयादि अनुक्रमेण स्थापयेत् यथा . .

ॐ खट्वाङ्गाय नमः तम् आवाहयामि स्थापयामि ॥१॥

ॐ जीववर्मणे नमः तम् आवाहयामि स्थापयामि ॥२॥

ॐ काशीदासाय नमः तम् आवाहयामि स्थापयामि ॥ ३ ॥

ॐ पर्वताय नमः तम् आवाहयामि स्थापयामि ॥ ४ ॥

ॐ नाथजिते नमः तम् आवाहयामि स्थापयामि ॥५॥

ॐ नाचिकेताय नमः तम् आवाहयामि स्थापयामि ॥६॥

ॐ नन्दुभयाय नमः तम् आवाहयामि स्थापयामि ॥७॥

ॐ नरोत्तमाय नमः तम् आवाहयामि स्थापयामि ॥ ८ ॥

ततो दक्षपार्श्वे ॐ नृसिंहानन्दमुनीन्द्रादि सभ्येभ्यो नमः तान् आवाहयामि स्थापयामि ॥१॥

ततः पृष्ठ भागे च ॐ रामसिंहादिपार्षदगङ्गादत्तमुन्यादिहरिभक्तेभ्यो नमः तान् आवाहयामि स्थापयामि ॥२॥

वामपार्श्वे च ॐ जयारमाललितादिसर्वभक्ताभ्यो नमः ताः आवाहयामि स्थापयामि ॥३॥

एवं प्रत्येकं प्रणवादिनमोंऽतैः स्थापयेत् । ततो मूलेन प्रतिष्ठां कुर्यात् प्रतिष्ठान्ते च इदमत्र चन्दनञ्च पुष्पाणि समर्पयामि ।

## अथ कलशपूजनम् ।

ततः स्ववामभागे जलपूरितं कलशं संस्थाप्य कलशे तीर्थान्यावाह्य पूजयेत् ।

तीर्थान्युन्मत्तगङ्गाश्रीगोमतीप्रमुखानि वै ।
सर्वाण्यायान्तु कलशे पूजाकाले सदा मम ॥१॥
ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ! ।
तेन सत्येन मे देव ! तीर्थं देहि दिवाकर ! ॥२॥

તર્જની આંગળી ઉંચી કરી કળશમાં બોળવી.

इति सूर्यमण्डलादंकुशमुद्रया तीर्थान्यावाह्य धेनुमुद्रां प्रदर्श्य गन्धपुष्पाक्षतैः सम्पूज्य तेन तीर्थोदकेन आत्मानं पूजोपहारांश्च सम्प्रोक्षेत्।

ચંદન ચોખાવાળું કળશમાં પધરાવેલું પાણી
દુર્વાથી ચારે બાજુ છાંટવું.

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यान्तरः शुचिः॥

श्रीहरिकृष्णभगवतः पूजाधिकारयोग्यता सिध्यर्थं देहन्यासान् करिष्ये।

इति सङ्कल्पः॥

स्वामिनारायणो नीलकण्ठः।

इत्यादि श्लोकोक्तनामभिरङ्गुष्ठादिन्यासान् कुर्यात्।

ॐ श्री स्वामिनारायणाय नमः अङ्गुष्ठाभ्यां नमः
ॐ नीलकण्ठाय नमः तर्जनीभ्यां नमः
ॐ नारायणाय नमः मध्यमाभ्यां नमः
ॐ हरये नमः अनामिकाभ्यां नमः
ॐ हरिकृष्णाय नमः कनिष्ठिकाभ्यां नमः
ॐ सहजानन्दाय नमः करतलकरपृष्ठाभ्यां नमः
ॐ कृष्णाय नमः व्यापकं कुर्यात्।

अथ हृदयादिन्यासाः

ॐ श्रीस्वामिनारायणाय नमः हृदयाय नमः
ॐ नीलकण्ठाय नमः शिरसे स्वाहा
ॐ नारायणाय नमः शिखायै वषट्
ॐ हरये नमः कवचाय हुम्
ॐ हरिकृष्णाय नमः नेत्राभ्यां वौषट्
ॐ सहजानन्दाय नमः अस्त्राय फट्
ॐ कृष्णाय नमः सर्वाङ्गे॥

अथ त्रयोदशाक्षरमन्त्रेण न्यासान् कुर्यात् । अस्य श्रीत्रयोदशाक्षरमन्त्रस्य अखण्डानन्द ऋषिः । गायत्री छन्दः । अवतारिश्रीहरिकृष्णभगवद्देवता । धर्मपुत्र इति बीजम् । नैष्ठिकव्रतधर इति शक्तिः । भक्तिप्रवर्तक इति कीलकम् । भगवत्श्रीस्वामिनारायणाय प्रीत्यर्थं न्यासे विनियोगः ।

(ભગવાનને ન્યાસ કરાવવા.)

ॐ नमो अङ्गुष्ठाभ्यां नमः

ॐ अवतारिणे तर्जनीभ्यां नमः

ॐ स्वामिनारायणाय मध्यमाभ्यां नमः

ॐ नमो अनामिकाभ्यां नमः

ॐ अवतारिणे कनिष्ठिकाभ्यां नमः

ॐ स्वामिनारायणाय करतलकरपृष्ठाभ्यां नमः

एवं हृदयादिन्यासाः

ॐ नमो हृदयाय नमः

ॐ अवतारिणे शिरसे स्वाहा

ॐ स्वामिनारायणाय शिखायै वषट्

ॐ नमो कवचाय हुम्

ॐ अवतारिणे नेत्राभ्यां वौषट्

ॐ स्वामिनारायणाय अस्त्राय फट् ।

अथ तन्मन्त्रवर्णैर्नाभ्याद्यङ्गन्यासान् कुर्यात्

1. ॐ नकारं नाभौ
2. ॐ मोकारम् उदरे
3. ॐ वकारं हृदये
4. ॐ ताकारं कण्ठे
5. ॐ रिकारं मुखे
6. ॐ णेकारं नासिकयोः

७. ॐ स्वाकारं चक्षुषोः
८. ॐ मिकारं कर्णयोः
९. ॐ नाकारं ललाटे
१०. ॐ राकारं मूर्ध्नि
११. ॐ यकारं शिखायां
१२. ॐ णकारं स्कन्धयोः

१३. ॐ यकारं सर्वाङ्गेषु

१४. ॐ नमोऽवतारिणे स्वामिनारायणाय नमः सर्वाङ्गेषु ।

इति देहन्यासान् कृत्वा मूलेन भगवदङ्गन्यासांश्च कृत्वा हरिपार्श्वयोर्घृतदीपान् प्रज्वाल्य तान् गन्धादिना पूजयेत् । દીવાનું પૂજન કરજો.

॥ अथ शङ्खपूजनम् ॥

(શંખ ધોઈ ચંદન-ચોખા-પુષ્પથી પૂજન)

ततः प्रक्षालितं शङ्खं संस्थाप्य गन्धाक्षतपुष्पाणि समर्पयामि ।

कृष्णोन नादितो भक्तान् हर्षं दैत्यान् भयं सदा ।

दायिने हरिप्रेष्ठाय पाञ्चजन्याय ते नमः ॥१॥ इति प्रणमेत् ।

॥ अथ घण्टापूजनम् ॥

ततो गरुडाधिष्ठितघण्टां प्रक्षाल्य ॐ गरुडाय नमः

ઘંટામાં રહેલા ગરુડજી ને નવરાવી ચંદન પુષ્પથી પૂજન કરજો.

गन्धाक्षतपुष्पाणि समर्पयामि ।

उत्थापनार्थं कृष्णस्य त्रासायैव सुरद्विषाम् ।

घण्टावाद्यान्विताय श्रीगरुडाय नमोऽस्तु ते ॥२॥ इति प्रणमेत् ।

ततो ब्रह्मरूपः सन् प्राणायामं समाचरन् अव्यग्रमनसा हृदि श्रीस्वामिनारायणं ध्यायेत् ॥

॥ अथ ध्यानम् ॥

श्रीकृष्णं द्विभुजं किशोरवयसं धार्मिं सुपद्मेक्षणं

सस्मेराब्जमुखं स्वभक्तसमितौ सिंहासने संस्थितम् ।

भक्तैः केसरचन्दनैर्बहुविधैर्हारावतंसादिभिः

पौष्पैः पूजितमादरेण हृदये शुक्लाम्बरं चिन्तये ॥३॥

मूलेन श्रीहरिकृष्णभगवते नमः ध्यानं समर्पयामि ।

॥ अथ षोडसोपचारेण बाह्य पूजा ॥

उपचारैर्बहुविधैर्मानसैस्तं प्रपूज्य सः ।
आवाहनं प्रकुर्वीत मूर्तौ तस्य महाप्रभोः ॥४॥

इति बहुविधैरुपचारैः हरिमानसपूजां कृत्वा घण्टानादेन सह . . .

ઘંટા વગાડવી અથવા તાળી પાડવી.

उत्तिष्ठोत्तिष्ठ गोविन्द ! उत्तिष्ठ गरुडध्वज ! ।
उत्तिष्ठ कमलाकान्त ! त्रैलोक्यं मङ्गलं कुरु ॥ १ ॥
उत्तिष्ठोत्तिष्ठ हे नाथ ! स्वामिनारायण ! प्रभो ! ।
धर्मसूनो ! दयासिन्धो ! स्वेषां श्रेयः परं कुरु ॥२॥

एतेन मन्त्रेण घण्टानादं तालिकाध्वनिं कृत्वा सुप्तोत्थितं भावयेत् च सः । ततः आवाहनादि

षोडशोपचारैः बाह्यपूजां कुर्यात्

ભગવાનને થાળીમાં પધરાવી ચોખા અર્પણ કરવા.

॥ अथ आवाहनम् ॥

भक्तानामभयङ्करं प्रियतमं स्वेषां स्वमूर्तिप्रदं
धार्मिं त्वां पुरुषोत्तमं सुखनिधिं चावाहनीयं सदा ।
स्वीयं भागवताख्यधर्ममवितुं प्राकट्यमाप्तं क्षितौ
सर्वेषां पुरुमङ्गलस्य विधये ह्यावाहयामि प्रभो ! ॥५५ ॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः आवाहनं समर्पयामि ।

ततस्तदङ्गदेवांश्च क्रमेणैव पृथक् पृथक् ।
आवाह्य नाममन्त्रैस्तान् सुप्रतिष्ठापयेत् च सः ॥५६ ॥

इति अङ्गदेवावाहनम् ।

अथासनम् :-

रत्नेन्द्रैः खचिते सुवर्णरचिते सिंहासने भासुरे
रम्ये देवविनिर्मितेऽतिविततं सोपानसंराजिते ।

सिंहाकारपदाष्टकेऽति मृदुले दासेन दत्ते मया

सद्भिर्हृत्कमले निवासित उरु प्रेम्णा निषीद प्रभो ! ॥५७॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः आसनं समर्पयामि ॥

### अथ पाद्यम्

ચરણમાં પાણીની ચમચી અર્પણ કરજો.

मुक्तैः सेवितपादपङ्कजयुगः पुण्यात्मजः श्रीपते !

कारुण्येन निजेन तारितजनस्त्वं नीलकण्ठाभिधः ।

गङ्गाया जलमुत्तमं सुरपते ! गन्धेन पुष्पाक्षतै

र्युक्तं पाद्यमिदं सुवर्णकलशे संस्थं गृहाण प्रभो ! ॥५८॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः पाद्यं समर्पयामि ॥

### अथार्घ्यम्

હાથમાં પાણીની ચમચી અર્પણ કરજો.

नित्यं शेषविधीशदेवमुनिभिः प्रेम्णार्चिताङ्घ्रिर्हरे

जातः साधुजनान् वृषस्य सुखिनः कर्तुं गृहे त्वं स्वयम् ।

दूर्वापद्मपवित्रशर्षचयवश्रीखण्डपुष्पाक्षतै

र्युक्तं काञ्चनभाजनस्थमुदकं ह्यर्घ्यं गृहाण त्विदम् ॥५९॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः अर्घ्यं समर्पयामि ॥

### अथ आचमनीयम्

મુખમાં પાણીની ચમચી અર્પણ કરજો.

जीवात्यन्तिकमोक्षमीश ! कृपया कर्तुं भुवि त्वं हरे

प्रादुर्भूय जनेषु सत्सु सदयश्चैकान्तधर्मं दधत् ।

प्रीत्या वासितमुत्तमं सुनलदैर्गङ्गोदकं शीतलं

स्वामिन्नाचमनीयकं शुभमिदं गृह्णीष्व दत्तं मया ॥६०॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः आचमनीयं समर्पयामि ॥

अथ मलापकर्षस्नानम् ।

ચંદનવાળાં પાણીથી સ્નાન કરાવજો.

स्वासक्तैः स्ववृषे स्थितैश्च मुनिभिः साकं स्वगङ्गाजले
कर्तुं स्नानमहर्निशं सुनिरतस्त्वं स्वामिनारायणः ।
उष्णं शीतलमेव चाम्बुकलशे संस्थं यथर्तु प्रभो !
भक्ताधीन ! मलक्षयाय च मया दत्तं हरे स्वीकुरु ॥६१॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः मलापकर्षस्नानं समर्पयामि ।

॥ अथ पञ्चामृतस्नानम् ॥

દહીં-દૂધ-સાકર-મધ-ઘી મિક્ષ કરી સ્નાન કરાવવું.

ब्रह्माख्ये निजधाम्नि दिव्यविभवैर्युक्तः स्थितः सर्वदा
मुक्तैः सेवितपादपल्लवयुगो नैकावतारान् दधत् ।
धर्माङ्गप्रभवः पयोदधि घृतं क्षौद्रं सितां कृष्ण ! मे
प्रीत्यर्थं स्नपनं गृहाण कृपया पञ्चामृतेन प्रभो ॥६२॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः पञ्चामृतस्नानं समर्पयामि ॥

॥ अथ पयःस्नानम् ॥ દૂધ.

भूमौ कोशलदेश एव सुकृतागारे शुभे यो हरे
प्रादुर्भूय विनाशितासुरजनो दृष्ट्यैव शस्त्रैर्विना ।
तुभ्यं कामदुघासमुद्भवमिदं यज्ञस्य हेतु पयः
सर्वेषां परमं च जीवनमिदं स्नानार्थमद्धार्पये ॥६३॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः पयःस्नानं समर्पयामि ।

पयःस्नानान्ते शुद्धोदकस्नानं कारयित्वा चन्दनं तुलसीपत्रं समर्पयामि ॥

ચંદન અને તુલસીપત્ર અર્પણ કરજો.

॥ ततो दधिस्नानम् ॥ દહીં.

लोकेशैर्विधिशङ्करादिविबुधैः प्रेम्णार्थितः श्रीपते !
भूत्वा त्वं प्रकटोऽत्र नूनमवनेर्भारस्य कुर्वन् क्षयन् ।

उद्धृतं पयसोऽम्लवस्तु वशतः शुद्धं समण्डं हरे !
दध्यानीतमिदं गृहाण च मया स्नानाय पूर्णः स्वयम् ॥६४॥
साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः दधिस्नानं समर्पयामि ।
दधिस्नानान्ते शुद्धोदकस्नानं कारयित्वा चन्दनं तुलसीपत्रं समर्पयामि ॥
ચંદન અને તુલસીપત્ર અર્પણ કરજો.

॥ ततो घृतस्नानम् ॥ ઘી.

स्वामिन् श्रीहरिकृष्णदेवसहजानन्द ! प्रभो ! धर्मज !
स्वानां मोक्षकर ! क्षमाजलनिधे ! श्रीनीलकण्ठाय ते ।
उत्पन्नं नवनीततो घृतमहं सर्वप्रतोषपदं
यज्ञाङ्गं विबुधप्रियं सुखकरं स्नानार्थमीशार्पये ॥६५॥
साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः घृतस्नानं समर्पयामि ।
घृतस्नानान्ते शुद्धोदकस्नानं कारयित्वा चन्दनं तुलसीपत्रं समर्पयामि ॥
ચંદન અને તુલસીપત્ર અર્પણ કરજો.

॥ ततो मधुस्नानम् ॥ મધ.

देवेन्द्रादिजयेन गर्वमतुलं सन्धारयन्तं स्मरं
तं यस्या- श्रयणेन भूरिमनुजा यत्नं विना प्राजयन् ।
तस्मै श्रीहरये सुपुष्टिकरणं सारं तरूणामिदं
सर्वेषां महसां विवर्द्धनमिदं स्नातुं च मध्वर्पये ॥६६॥
साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः मधुस्नानं समर्पयामि ।
मधुस्नानान्ते शुद्धोदकस्नानं कारयित्वा चन्दनं तुलसीपत्रं समर्पयामि ॥
ચંદન અને તુલસીપત્ર અર્પણ કરજો.

॥ ततो शर्करास्नानम् ॥ સાકર.

भक्त्यङ्ग प्रभवः प्रसन्नवदनः कारुण्यवार्द्धिर्हरे !
साधु- ब्राह्मण देव रञ्जनकरो नारायण ! श्रीपते ! ।
इक्षोः सारत एव सृष्टुविहितां रम्यां मलापक्षयां
स्नातुं त्वं सितशर्करामथ मया प्रित्यार्पितां स्वीकुरु ॥६७॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः शर्करास्नानं समर्पयामि ।

शर्करास्नानान्ते शुद्धोदकस्नानं कारयित्वा चन्दनं तुलसीपत्रं समर्पयामि ।

ચંદન અને તુલસીપત્ર અર્પણ કરજો.

અત્તર અર્પણ કરવું.

तदनन्तरमत्तरसुगन्धतैलादिना भगवदङ्गोद्वर्तनं कृत्वा शिरसि गन्धाक्षतपुष्पाणि निधाय अथैतस्य हिरण्यकलशेन सन्ततधारया

દૂધથી અભિષેક કરવો.

श्रीहर्यष्टोत्तरशतनामस्तोत्रेणाभिषेकं कुर्यात् ।

हे धर्मपुत्र ! हरिकृष्ण तपःप्रियाद्य
नारायणाखिलगुरो विजितेन्द्रियेश ।
ज्ञानिन् प्रभोऽनिलसुतेष्ट हरे ह्यजन्मन्
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥१॥

भूमन् बृहद्व्रतधरात्मद वासुदेव
भक्त्यात्मजास्तिकमहाव्रत साधुशील ।
स्वामिन् स्वतन्त्र घनमेचक नीलकण्ठ
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥२॥

योगीश्वरातिकरुणार्द्रविलोचनाब्ज
सिद्धेश्वरोद्धवमताब्जविकाशसूर्य ! ।
पाषण्डखण्डनपटो स्वजनार्द्रचित्त
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥३॥

ब्रह्मन् परात्पर ! विभोऽक्षरवास विष्णो
कारुण्यसागर महामुनिवन्दिताङ्घ्रे ।
भक्तप्रियोत्तम सुराधिपवन्द्यपाद !
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥४॥

मुक्तेड्य ! चाश्रितजनार्तिहरप्रताप !
धर्माढ्य भक्तिपथपोषक दिव्यमूर्ते ।

तापत्रयाभिभववार्तजनानुराग
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥५॥
लक्ष्मीपते जनपते स्वपते परात्मन्
मायापते मुनिपतेऽजपते महात्मन् ।
गोपी पतेऽक्षरपतेऽर्कपतेऽव्ययात्मन्
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥६॥
शुद्धप्रगल्भ पुरुषोत्तम मोक्षदायिन्
दान्तातिशान्ति विशदाशयभक्तलभ्य।
वाग्मिन्क्षमाजलनिधे शुभलक्ष्मपाद
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥७॥
सर्वोपकारक परात्पर पुण्यकीर्ते
निर्दोष निस्पृह वशिन्निजभक्तपूज्य
लोभादिदोषदमनाच्युत कौलहन्तः
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥८॥
यज्ञेड्य ! यज्ञहृदयामर यज्ञत्रातो
यज्ञेश यज्ञफलदोत्तम यज्ञकर्तः ।
यज्ञेज्य यज्ञविधिशंसन यज्ञमूर्ते
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥९॥
सर्वज्ञ दिव्यचरितातिमनोज्ञ सत्य
वेदैकवेद्य पुरुषार्थद दीनबन्धो ।
धर्मेष्टनिर्गुण निरञ्जन नित्यमुक्त
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥१०॥
गोविंद केशव वरेण्य महाधिराज
दैत्यान्तकाशुभहराशुद वर्णिवेष ।
स्वस्तोत्रपाठकजनेच्छित सर्वदायिन्
कृष्णं नमामि सततं ह्यवतारिणं त्वाम् ॥११॥

अमृताभिषेकोऽस्तु ।

ततः शुद्धोदकस्नानम् । (શુદ્ધ જળથી સ્નાન કરાવવું.)

गङ्गायां मुनिभिः सहैव बहुभिर्नित्यं स्वतन्त्रः स्वयं
स्वामिन् स्नानकरः सुकेली सहितं भक्तैस्तथा पार्षदैः ।
शीतं वोष्णमिदं यथर्तु सुखदं ह्युन्मतगङ्गाजलं ।
कृष्ण त्वं विशदं गृहाण च मया स्नानीयमन्त्रार्पितम् ।।६८।।

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः शुद्धोदकस्नानं समर्पयामि ।

स्नानान्ते आचमनीयं समर्पयामि ।

अथ वस्त्रम् । (વસ્ત્રો અર્પણ)

निष्कामैर्निजसेविभिः स्वनिरतैर्दत्तानि भक्त्या जनैः
कृष्णास्त्वं धृतवान् प्रभोऽतिकृपया वस्त्राणि रम्याणि वै ।
कार्पासेन विनिर्मितं घनतरं सूक्ष्मञ्च वस्त्रद्वयं
सौवर्णेन विराजितं शुभमिदं दत्तं मया स्वीकुरु ।।६९।।

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः वस्त्रोपवस्त्रं समर्पयामि ।

ततो यज्ञोपवीतम् । (જનોઈ આપવી)

वर्णीन्द्राय नमोऽस्तु ते वरदराट् श्रीनीलकण्ठ ! प्रभो !
दासं मां करुणानिधेऽव भगवन् ब्रह्मव्रतस्य क्षतेः ।
भूमौ नैष्ठिकधर्मपोषणकरस्त्वं सोतरीयं सितं ।
दत्तं तुभ्यमिदं गृहाण कृपया यज्ञोपवीतं मया ।।७०।।

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः यज्ञोपवीतं समर्पयामि ।

अथाभूषणम् । (ઘરેણાં અર્પણ કરવાં)

रत्नाढ्यैरशनाकिरीटकटकस्रक्कुण्डलैश्चोर्मिका
मञ्जीराङ्गदशृङ्खलादिभिरहं जाम्बूनदाभूषणैः ।
हारैर्मौक्तिकनिर्मितैश्च विविधैर्गुच्छादिभिः शेखरै
स्त्वां भक्त्यात्मज पूजयामि कृपया त्वं श्रीहरे स्वीकुरु ।।७१।।

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः आभूषणानि समर्पयामि ।

## अथ मधुपर्कम् । (સાકરવાળું દહીં જમાડવું.)

इक्षुद्भूत रसान्वितं मधुयुतं गोक्षीरसर्पिदधि-
मिश्रं भास्वरहेमभाजन भृतं प्रेम्णा मयैवार्पितं ।
स्वामिंस्त्वं मधुपर्कमुत्तममिमं माङ्गल्य मात्रास्पदं
सर्वोत्कृष्टरसात्मविग्रह हरे सर्वार्तिहृत् स्वीकुरु ॥७२॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः मधुपर्कं समर्पयामि ।

## अथ चन्दनम् ।

सद्भिः प्रेमभरेण नित्यमनघैः स्वेच्छानुकूलं विभो
सर्वाङ्गेऽगुरु चन्दनैः सुरभिभिर्ब्रह्मात्मभिः पूजितः ।
कर्पूरागरु केसरैर्मृगमदैः सम्मिश्रितं सुन्दरं
कृष्ण त्वं शुभचन्दनं मलयजं गृह्णीष्व दत्तं मया ॥७३॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः चन्दनं समर्पयामि ।

## अथ तुलसीपत्रम् ।

शालग्राम सुरूपतां च भजते यस्या अधीनस्तरो
रूपिण्या मृदुपुष्पपर्णसहितास्तस्याः सहस्त्रं हरे ! ।
तुभ्यं मञ्जिरिका ददामि विमलास्त्वं नाममन्त्रैरहं
वृन्दाया हरितो गृहाण भगवन् वाष्टोत्तरं ताः शतम् ॥७४॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः तुलसीपत्राणि समर्पयामि ।

## अथ सौभाग्यद्रव्यम् ।

(અબીર, ગુલાલ, સિન્દુર, કુંકુમ, હળદર અર્પણ કરવું.)

सिन्दुरं वरकुङ्कुमं मृगमदाबीरे हरिद्रां तथा
सौभाग्यं त्वमिदं गृहाण भगवन् सर्वं गुलालादिकं ।
नित्यं स्वीयजनान् कृपाजलनिधे सौभाग्य मूर्ते सदा
दोषेभ्यो विरहय्य नोऽतिशुभगान् कुर्वात्मशर्मप्रद ॥७५॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः सौभाग्यद्रव्यं समर्पयामि ।

अथ सुगन्धितैलम् । (અત્તર)

कारुण्याम्बुनिधे तिलोद्भवमिदं सौगन्धितैलं प्रियम्
जातीचम्पककुन्दकेतकमुखैः पुष्पोत्तमैर्वासितम् ।
कालोत्पन्नसुमैर्युतं मलहरं श्रीमत्स्वमूर्तौ हरे
कर्तुं मर्दनमुत्तमं च विविधं दत्तं मया स्वीकुरु ॥७६॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः सुगन्धितैलं समर्पयामि ।

अथाक्षतान् । (ચોખા)

सौरभ्येण युताँश्च चन्दनयुतान् काश्मीरमिश्रान्महा
व्रीहिभ्यो जनीतांश्च मङ्गलमयानन्वर्थयुक्ताक्षतान् ।
सर्वेषां पुरु तृप्तिकारकतया सद्धान्यमात्रोत्तमान्
स्वामिंस्त्वं कृपया गृहाण च मया भक्त्यार्पितान् श्रीपते ! ॥७७॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः अक्षतान् समर्पयामि ।

अथ पुष्पाणि । (પુષ્પ અર્પણ કરવાં.)

जाती चम्पक कर्णिकार कमलैः सन्मल्लिका यूथिका
मन्दारस्थलपद्म केतक महाकुन्दैश्च पुन्नागजैः ।
पुष्पैर्दूषणवर्जितैर्बहुविधैस्त्वां पूजयामि प्रभो !
तानि त्वं सदयं गृहाण कुसुमालङ्कारधृच्छ्रीहरे ॥७८॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः पुष्पाणि समर्पयामि ।

अथ दूर्वा । (છબર અર્પણ કરવી.)

सर्वेषां द्युपते सदा प्रियतमां दूर्वां पयोब्ध्युद्भवां
शौभाढ्यां जननीव सर्वहितकृद्दीर्घप्ररोहामिमाम् ।
पृथ्वीवच्च महाक्षमाजलनिधे शश्वद्धरिद्विग्रहां
लक्ष्मीनाथ ! मयि प्रसीद च मया प्रीत्यार्पितां स्वीकुरु ॥७९॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः दूर्वां समर्पयामि ॥

ડાબા હાથમાં ચોખા લઈ જમણા હાથની વચ્ચેની બે આંગળી વડે મૂકતા આવજો. अथाङ्गपूजा :- वाराह-कूर्मर्षभ-वामन-नृसिंह-नारायण-बुद्ध-कल्किभिः कुमाररामाध्वरसाङ्ख्यकृद्धरिकृष्णोष्टदेवैः सकलाङ्गपूजनम् ।

ॐ वाराहाय नमः पादौ पूजयामि ॥१॥

ॐ कुर्माय नमः गुल्फौ पूजयामि ॥ २ ॥

ॐ ऋषभाय नमः जङ्घे पूजयामि ॥ ३ ॥

ॐ मत्स्याय नमः जानुनी पूजयामि ॥४॥

ॐ वामनाय नमः ऊरू पूजयामि ॥५॥

ॐ नृसिंहाय नमः कटी पूजयामि ॥६॥

ॐ नारायणाय नमः नाभिं पूजयामि ॥७॥

ॐ बुद्धाय नमः हृदयं पूजयामि ॥८॥

ॐ कल्किने नमः कण्ठं पूजयामि ॥९॥

ॐ कुमाराय नमः बाहू पूजयामि ॥१०॥

ॐ रामाय नमः हस्तौ पूजयामि ॥११॥

ॐ यज्ञनारायणाय नमः मुखं पूजयामि ॥ १२ ॥

ॐ साङ्ख्यशास्त्रकृत्कपिलाय नमः नेत्रे पूजयामि ॥१३॥

ॐ हरये नमः श्रोत्रे पूजयामि ॥१४॥

ॐ कृष्णाय नमः ललाटं पूजयामि ॥१५॥

ॐ इष्टदेवाय नमः सर्वाङ्गानि पूजयामि ॥१६॥

अथ धूपम् । (અગરબતીનો ધૂપ)

यन्मूर्तौ सुरभि त्वमस्ति सहजं यादृङ्मनोरञ्जनं,
कस्मिंश्चिज्जगतीह नास्ति हि तथा लेशोऽपि तस्य क्वचित् ।
स त्वं कृष्ण दशाङ्गसंज्ञितमिदं धूपं सुगन्धि हरे,
भक्त्या मेऽर्पितमुत्तमं हृदयगं घ्राणप्रियं स्वीकुरु ॥८०॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः धूपं समर्पयामि ।

अथ दीपम् । (દીવો)

सूर्याग्न्यत्रिसुतादयः सुरगणा यद्धाम्न एवाक्षरात्
तेजो लेशमवाप्य विश्वमखिलं ह्युद्भासयन्ति प्रभो ।
तद्धामाधिपतिस्त्वमेव भगवन् दीपं कृपाम्भोनिधे
सामोदेन गवां घृतेन विहितं गृह्णीष्व वर्तिद्वयम् ॥८१॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः दीपं समर्पयामि ॥

अथ परिविष्टमन्नं शंखोदकेन मूलेनाभ्युक्ष्य हस्ते जलमादाय ।
(થાળને શંખજળથી ચારેબાજુ પ્રોક્ષણ કરવું)

अथ नैवेद्यम् । (નાનો થાળ)

नैवेद्यं परमान्नसक्तुवटकान् संयावपुरीस्तथा,
दौहित्रान् घृतपूरसूपसुखदाफेणीरसालौदनान् ।
रम्यां शष्कुलिकां बिरञ्जगुडकान्पूपान्सितान् पिण्डकान्
कृष्ण त्वं घृतशर्करादधिपयश्चेत्यादिकं स्वीकुरु ॥८२॥

अत्र चन्दनं, पुष्पं, धूपं, दीपं, नैवेद्यं, तथाकृतां पूजां अमृतस्वरूपेण स्वाहा ।

ડાબો હાથ મુખે આડો દઈ જમણા હાથે ભગવાનને જમાડવા.

१.ॐ प्राणाय स्वाहा २.ॐ अपानाय स्वाहा
३.ॐ व्यानाय स्वाहा
४.ॐ उदानाय स्वाहा ५.ॐ समानाय स्वाहा ।

साङ्गसपरिवार श्रीहरिकृष्णभगवते नमः नैवेद्यं समर्पयामि ।

मध्ये पानीयं समर्पयामि, नैवेद्यान्ते आचमनीयं समर्पयामि, हस्तप्रक्षालनं समर्पयामि, करोद्वर्तनार्थे चन्दनं समर्पयामि, कृतायाः पूजायाः साद्गुण्यार्थं फलं समर्पयामि, ताम्बुलं समर्पयामि, फलम् समर्पयामि, दक्षिणां समर्पयामि, प्रथम आरती (१) आरार्त्रिकं प्रदक्षिणां नमस्कारान् समर्पयामि ।

साङ्गसपरिवार श्रीहरिकृष्णभगवते नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ।

(પુષ્પ અર્પણ) क्षमापयेत् इति षोडशोपचारः ।

## अथ परिवारार्चनम् ।

श्रीहरिकृष्ण भगवत्पूजनाङ्गभूतं श्रीहरिकृष्णपूजनपूर्वकं रामप्रतापादि-पूजनं करिष्ये इति सङ्कल्पः ॥ ડાબા હાથમાં ચોખા લઈ જમણા હાથની વચ્ચેની બે આંગળી વડે મૂકતા આવજો.

कर्णिकायां गन्धाक्षतादिभिः पूजयेयम् । यथा मध्ये

ॐ घनश्यामं द्विभुजं पद्मपत्राक्षसिताम्बरावतारिदक्षवामस्थ भक्तिधर्मान्वितश्रीहरिकृष्णभगवते नमः एतद्विशेषणविशिष्टं श्रीहरिकृष्णं भगवन्तं पूजयामि ॥१॥

तत्पृष्ठे ॐ छत्रधारिणे रामप्रतापाय नमः तं पूजयामि॥२॥

तत्रैव ॐ सौम्याङ्गकरात्ततालवृन्तकेच्छारामाय नमः तं पूजयामि ॥३॥

श्रीहरिकृष्णदक्षपार्श्वे ॐ गृहीतचामरायोध्याप्रसादाय नमः तं पूजयामि॥४॥

श्रीहरिवामपार्श्वे ॐ गृहीतचामररघुवीराय नमः तं पूजयामि॥५॥

ચોખા રાખી દેજો. मूलेन श्रीहरि-कृष्णभगवदादिभ्यो नमः चन्दनं, पुष्पं, धूपं, दीपं,नैवेद्यं, फलं,ताम्बुलं,दक्षिणां ( २ ) आरार्त्रिकं प्रदक्षिणां, नमस्कारान् समर्पयामि ।

पुष्पाञ्जलिं गृहीत्वा :- (હાથમાં પુષ્પ લેજો.)

अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।<br>
साक्षाच्छ्रीहरिकृष्णं त्वां सम्पूज्य प्रणमाम्यहम् ॥१॥

इति श्रीहरिकृष्णभगवदादिभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ।

ततः प्रणमेत् । एते श्रीहरिकृष्णभगवदादयः पूजिता सन्तु पूजां गृह्णन्तु सुप्रसन्ना वरदा भवन्तु ॥१॥

अथ मुकुन्दानन्दवर्णिन्द्रादिपूजनमहं करिष्ये इति संकल्पः ।

પાણીની ચમચી મૂકજો.

ડાબા હાથમાં ચોખા લઈ જમણા હાથની વચ્ચેની બે આંગળી વડે મૂકતા આવજો.

ततोऽष्टकेसरेषु पूर्वाग्नेयादिक्रमेण षोडशसद्गुरून् एकैकस्मिन् केसरे द्वौ द्वौ पूजयेयम् :- यथा

ॐ मुकुन्दानन्दवर्णीन्द्राय नमः तं पूजयामि॥१॥
ॐ जयानन्दवर्णीन्द्राय नमः तं पूजयामि॥२॥
ॐ मुक्तानन्दमुनीन्द्राय नमः तं पूजयामि॥३॥
ॐ गोपालानन्दमुनीन्द्राय नमः तं पूजयामि॥४॥
ॐ ब्रह्मानन्दमुनीन्द्राय नमः तं पूजयामि॥५॥
ॐ नित्यानन्दमुनीन्द्राय नमः तं पूजयामि॥६॥
ॐ व्यापकानन्दमुनीन्द्राय नमः तं पूजयामि॥७॥
ॐ स्वरूपानन्दमुनीन्द्राय नमः तं पूजयामि॥८॥
ॐ कृपानन्दमुनीन्द्राय नमः तं पूजयामि॥९॥
ॐ आनन्दानन्दमुनीन्द्राय नमः तं पूजयामि॥१०॥
ॐ चैतन्यानन्दमुनीन्द्राय नमः तं पूजयामि॥११॥
ॐ परमानन्दमुनीन्द्राय नमः तं पूजयामि॥१२॥
ॐ अखण्डानन्दवर्णीन्द्राय नमः तं पूजयामि॥१३॥
ॐ वासुदेवानन्दवर्णीन्द्राय नमः तं पूजयामि॥१४॥
ॐ महानुभावानन्दमुनीन्द्राय नमः तं पूजयामि॥१५॥
ॐ शुकानन्दमुनीन्द्राय नमः तं पूजयामि॥१६॥

तत आग्नेयादिक्रमेण चतुःकेसराग्रेषु इमान् मुनीन्द्रान् पूजयेयम् यथा

अग्निकोणे ॐ धर्ममूर्तये आत्मानन्दमुनीन्द्राय नमः तं पूजयामि॥१॥
नैर्ऋतकोणे ॐ ज्ञानमूर्तये स्वयंप्रकाशानन्दमुनीन्द्राय नमः तं पूजयामि॥२॥
वायुकोणे ॐ वैराग्यमूर्तये निष्कुलानन्दमुनीन्द्राय नमः तं पूजयामि॥३॥
ईशानकोणे ॐ ऐश्वर्यमूर्तये सच्चिदानन्दमुनीन्द्राय नमः तं पूजयामि॥४॥

ततः केसरान्तरालेषु इमान् अवतारान् पूर्वाग्नेयादिक्रमेण द्वौ द्वौ पूजयेयम् । यथा

ॐ यज्ञाय नमः तं पूजयामि ॥१॥
ॐ उपेन्द्राय नमः तं पूजयामि ॥२॥
ॐ बुद्धाय नमः तं पूजयामि ॥३॥
ॐ ऋषभाय नमः तं पूजयामि ॥४॥
ॐ दत्तात्रेयाय नमः तं पूजयामि ॥५॥
ॐ कपिलाय नमः तं पूजयामि ॥६॥
ॐ मत्स्याय नमः तं पूजयामि ॥७॥
ॐ कूर्माय नमः तं पूजयामि ॥८॥
ॐ वाराहाय नमः तं पूजयामि ॥९॥
ॐ नृसिंहाय नमः तं पूजयामि ॥१०॥
ॐ व्यासाय नमः तं पूजयामि ॥११॥
ॐ गजाननाय नमः तं पूजयामि ॥१२॥
ॐ श्रीरामानन्दस्वामिने नमः तं पूजयामि ॥१३॥
ॐ हंसाय नमः तं पूजयामि ॥१४॥
ॐ परशुरामाय नमः तं पूजयामि ॥१५॥
ॐ कल्किने नमः तं पूजयामि ॥१६॥

इति सम्पूज्य मुकुदानन्दवर्णिन्द्रादिभ्यो नमः ॥

ચોખા રાખી દેજો.

चन्दनं, पुष्पं, धूपं, दीपं, नैवेद्यं,फलं, ताम्बूलं, दक्षिणां, आरार्त्रिकं ( ३ ), प्रदक्षिणां, नमस्कारान् ।

ततः पुष्पाञ्जलिंगृहीत्वा :- (હાથમાં પુષ્પ લેજો.)

ददताभीष्टसिद्धिं मे भगवदनुवर्तिनः ।
युष्मान् सम्पूज्य वन्देऽहं हरिसेवासमुत्सुकः ॥

इति मुकुन्दानन्दवर्णीन्द्रादिभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ।

ततः प्रणमेत् । एते मुकुन्दानन्दवर्णीन्द्रादिसद्गुर्वादयः पूजिताः सन्तु पूजां गृह्णन्तु सुप्रसन्ना वरदा भवन्तु ॥

अथ उत्तमादिश्रीहरिपार्षदप्रेमानन्दादिगायकपूजनमहं करिष्ये इति संकल्पः ।

ડાબા હાથમાં ચોખા લઈ જમણા હાથની વચ્ચેની બે આંગળી વડે મૂકતા આવજો.

ततोऽष्टदलेषु पार्षदान् पूर्वाग्नेयादि क्रमेण द्वौ द्वौ पूजयेयम् ॥

ॐ उत्तमाय नमः तं पूजयामि ॥ १ ॥

ॐ हेमन्तसिंहाय नमः तं पूजयामि ॥ २ ॥

ॐ सोमाय नमः तं पूजयामि ॥ ३ ॥

ॐ सूराय नमः तं पूजयामि ॥ ४ ॥

ॐ भृगुजिते नमः तं पूजयामि ॥ ५ ॥

ॐ रत्नजिते नमः तं पूजयामि ॥ ६ ॥

ॐ नाञ्जाय नमः तं पूजयामि ॥ ७ ॥

ॐ अलयाय नमः तं पूजयामि ॥ ८ ॥

ॐ नान्नाय नमः तं पूजयामि ॥ ९ ॥

ॐ माणक्यै नमः तां पूजयामि ॥ १० ॥

ॐ लक्षाय नमः तं पूजयामि ॥ ११ ॥

ॐ गालवाय नमः तं पूजयामि ॥ १२ ॥

ॐ कुबेरसिंहाय नमः तं पूजयामि ॥ १३ ॥

ॐ मानसिंहाय नमः तं पूजयामि ॥ १४ ॥

ॐ भीमाय नमः तं पूजयामि ॥ १५ ॥

ॐ अर्जुनाय नमः तं पूजयामि ॥ १६ ॥

ततो दलान्तरालेषु श्रीहरिगायकान् पूर्वाग्नेयादिक्रमेण द्वौ द्वौ पूजयेयम् ॥ यथा :-

ॐ प्रेमानन्दमुनये नमः तं पूजयामि ॥ १ ॥
ॐ देवानन्दमुनये नमः तं पूजयामि ॥ २ ॥
ॐ ज्ञानानन्दमुनये नमः तं पूजयामि ॥ ३ ॥
ॐ गुणातीतानन्दमुनये नमः तं पूजयामि ॥ ४ ॥
ॐ योगानन्दमुनये नमः तं पूजयामि ॥५ ॥
ॐ प्रज्ञानानन्दमुनये नमः तं पूजयामि ॥ ६॥
ॐ गोविन्दानन्दमुनये नमः तं पूजयामि ॥ ७॥
ॐ त्यागानन्दमुनये नमः तं पूजयामि ॥८॥
ॐ विरक्तानन्दमुनये नमः तं पूजयामि ॥ ९॥
ॐ आधारानन्दमुनये नमः तं पूजयामि ॥ १०॥
ॐ निरञ्जनानन्दमुनये नमः तं पूजयामि ॥ ११॥
ॐ अभेदानन्दमुनये नमः तं पूजयामि ॥ १२॥
ॐ निर्गुणानन्दमुनये नमः तं पूजयामि ॥ १३॥
ॐ भूधरानन्दमुनये नमः तं पूजयामि ॥ १४॥
ॐ सुखानन्दमुनये नमः तं पूजयामि ॥ १५॥
ॐ विज्ञानानन्दमुनये नमः तं पूजयामि ॥ १६॥

ચોખા રાખી દેજો.

इति सम्पूज्य उत्तमादिभ्यो नमः ॥ चन्दनं, पुष्पं, धूपं, दीपं, नैवेद्यं, फलं, ताम्बूलं, दक्षिणां, आरार्त्रिकं( ४ ), प्रदक्षिणां, नमस्कारान् समर्पयामि ।

मन्त्रपुष्पाञ्जलिं गृहीत्वा (હાથમાં પુષ્પ લેજો.)

ददताभीष्ट सिद्धिं मे भगवदनुवर्तिनः ।
युष्मान् सम्पूज्य वन्देऽहं हरिसेवासमुत्सुकः ॥

इति मन्त्रपुष्पाञ्जलिं समर्पयामि ।

ततः प्रणमेत् एते उत्तमादयः पूजिताः सन्तु पूजां गृह्णन्तु सुप्रसन्ना वरदा भवन्तु ॥

अथ नारायणानन्दवर्णीन्द्रादिवेदधारि-शतानन्दमुनीन्द्रादि शास्त्रधारि-कृष्णानन्दमुन्यादिस्तोत्रपाठकानां च पूजनं करिष्ये इति संकल्पः ।

પાણીની ચમચી મૂકજો.

ડાબા હાથમાં ચોખા લઈ જમણા હાથની વચ્ચેની બે આંગળી વડે મૂકતા આવજો.

ततो दलाग्रेषु पूर्वादिदिक्षु वैदिकान् आग्नेयादिविदिक्षु शास्त्रिणो दलाग्रान्तरालेषु श्रीहरिस्तोत्रपाठकाश्च पूर्वाग्नेयादिक्रमेण पूजयेयम् तथा

ॐ ऋग्वेदधारिणे नारायणानन्दवर्णिन्द्राय नमः तं पूजयामि ॥१॥

ॐ यजुर्वेदधारिणे आनन्दानन्दवर्णीन्द्राय नमः तं पूजयामि ॥ २ ॥

ॐ सामवेदधारिणे गोपालानन्दवर्णीन्द्राय नमः तं पूजयामि ॥३॥

ॐ अथर्ववेदधारिणे वैकुण्ठानन्दवर्णीन्द्राय नमः तं पूजयामि ॥४॥

ॐ धर्मशास्त्रधारिणे शतानन्दमुनीन्द्राय नमः तं पूजयामि ॥१॥

ॐ योगशास्त्रधारिणे योगानन्दमुनीन्द्राय नमः तं पूजयामि ॥२॥

ॐ सांख्यशास्त्रधारिणे भगवदानन्दमुनीन्द्राय नमः तं पूजयामि॥३॥

ॐ पञ्चरात्रशास्त्रधारिणे शिवानन्दमुनीन्द्राय नमः तं पूजयामि॥४॥

ॐ कृष्णानन्दमुनये नमः तं पूजयामि॥ १ ॥

ॐ अक्षरानन्दमुनये नमः तं पूजयामि॥ २ ॥

ॐ सर्वज्ञानन्दमुनये नमः तं पूजयामि॥३॥

ॐ अद्भुतानन्दमुनये नमः तं पूजयामि॥४॥

ॐ शुन्यातीतानन्दमुनये नमः तं पूजयामि॥५॥

ॐ तद्रूपानन्दमुनये नमः तं पूजयामि॥६॥

ॐ शान्तानन्दमुनये नमः तं पूजयामि॥७॥

ॐ पुरुषानन्दमुनये नमः तं पूजयामि॥८॥

ચોખા રાખી દેજો.

इति सम्पूज्य नारायणानन्दवर्णीन्द्रादिभ्यः नमः । चन्दनं, पुष्पं, धूपं, दीपं, नैवेद्यं, फलं, ताम्बूलं, दक्षिणां, आरार्त्रिकं ( ५ ), प्रदक्षिणां, नमस्कारान् समर्पयामि ।

मन्त्रपुष्पाञ्जलिंगृहीत्वा (હાથમાં પુષ્પ લેજો.)

ददताभीष्टसिद्धिं मे भगवदनुवर्तिनः ।

युष्मान् सम्पूज्य वन्देऽहं हरिसेवासमुत्सुकः ॥

इति मन्त्रपुष्पाञ्जलिं समर्पयामि ततः प्रणमेत् ।

एते नारायणानन्दवर्णिन्द्रादयः पूजिता सन्तु पूजां गृह्णन्तु सुप्रसन्ना वरदा भवन्तु ॥

अथ मयारामादिब्रह्मर्षिणां खट्वाङ्गादिभक्तेन्द्राणां नृसिंहानन्दादि-सभ्यानां च पूजनं करिष्ये इति संकल्पः । પાણીની ચમચી મૂકજો.

पद्माद्बहिर्ब्रह्मर्षीन् तत्समीपे भक्तेन्द्रान् पूर्वाग्नेयादिअनुक्रमेण पूजयेयं तथा ડાબા હાથમાં ચોખા લઈ જમણા હાથની વચ્ચેની બે આંગળી વડે મૂકતા આવજો.

ॐ मयारामाय नमः तं पूजयामि॥१॥

ॐ प्राणगोविन्दाय नमः तं पूजयामि॥२॥

ॐ लक्ष्मीरामाय नमः तं पूजयामि॥३॥

ॐ हेमन्तरामाय नमः तं पूजयामि॥४॥

ॐ शिवयाज्ञिकाय नमः तं पूजयामि॥५॥

ॐ मोहनरामाय नमः तं पूजयामि॥६॥

ॐ हरिशर्मणे नमः तं पूजयामि॥७॥

ॐ कृपाशङ्कराय नमः तं पूजयामि॥८॥

ॐ खट्वाङ्गाय नमः तं पूजयामि॥९॥

ॐ जीववर्मणे नमः तं पूजयामि॥१०॥

ॐ काशीदासाय नमः तं पूजयामि॥११॥

ॐ पर्वताय नमः तं पूजयामि॥१२॥

ॐ नाथजिते नमः तं पूजयामि॥१३॥

ॐ नाचिकेताय नमः तं पूजयामि॥१४॥

ॐ नन्दुभयाय नमः तं पूजयामि॥१५॥

ॐ नरोत्तमाय नमः तं पूजयामि॥१६॥

ततो दक्षपार्श्वे ॐ नृसिंहानन्दमुनीन्द्रादिसभ्येभ्यो नमः तान् पूजयामि ॥१॥

पृष्ठभागे च ॐ रामसिंहादिपार्षदगङ्गादत्तमुन्यादिहरिभक्तेभ्यो नमः तान् पूजयामि॥२॥

ચોખા રાખી દેજો.

इति सम्पूज्य मयारामादिब्रह्मर्षि खट्वाङ्गदिभक्तेन्द्र-नृसिंहानन्दादिसभ्येभ्यो नमः चन्दनं, पुष्पं, धूपं, दीपं, नैवेद्यं, फलं, ताम्बूलं, दक्षिणां आरार्त्रिकं (६), प्रदक्षिणां, नमस्कारान् समर्पयामि।

मन्त्रपुष्पाञ्जलिं गृहीत्वा (હાથમાં પુષ્પ લેજો.)

दद्ताभीष्टसिद्धिं मे भगवदनुवर्तिनः।

युष्मान् सम्पूज्य वन्देऽहं हरिसेवासमुत्सुकः ॥१॥

इति मन्त्रपुष्पाञ्जलिं समर्पयामि ततः प्रणमेत्।

एते मयारामादिब्रह्मर्षिखट्वाङ्गादिभक्तेन्द्रनृसिंहानन्दादिसभ्यांश्च पूजिताः सन्तु पूजां गृह्णन्तु सुप्रसन्ना वरदा भवन्तु ॥२॥

अथ जयारमाललितादिभक्तेन्द्राणां पूजनमहं करिष्ये इति सङ्कल्पः ॥

પાણીની ચમચી મૂકજો.

ડાબા હાથમાં ચોખા લઈ જમણા હાથની વચ્ચેની બે આંગળી વડે મૂકતા આવજો.

ॐ जयायै नमः तां पूजयामि॥१॥

ॐ रमायै नमः तां पूजयामि॥२॥

ॐ ललितायै नमः तां पूजयामि॥३॥

ॐ पाञ्चाल्यै नमः तां पूजयामि॥४॥

ॐ भक्तिमात्रे नमः तां पूजयामि॥५॥

ॐ सुवासन्यै नमः तां पूजयामि॥६॥

ॐ श्रद्धायै नमः तां पूजयामि॥७॥

ॐ मैत्र्यै नमः तां पूजयामि॥८॥

ॐ तुष्ट्यै नमः तां पूजयामि॥९॥

ॐ पुष्ट्यै नमः तां पूजयामि॥१०॥

ॐ क्रियायै नमः तां पूजयामि॥११॥

ॐ उन्नत्यै नमः तां पूजयामि॥१२॥

ચોખા રાખી દેજો.

इति सम्पूज्य जयारमाललितादिभक्ताभ्यः नमः चन्दनं, पुष्पं, धूपं, दीपं, नैवेद्यं, फलं, ताम्बूलं, दक्षिणां, आरार्त्रिकं (७), प्रदक्षिणां, नमस्कारान् समर्पयामि।

मन्त्रपुष्पाञ्जलिं गृहीत्वा ( હાથમાં ફૂલ લેજો. )

दददताभीष्टसिद्धिं मे भगवदनुवर्तिनः।

युष्मान् सम्पूज्य वन्देऽहं हरिसेवासमुत्सुकः॥

इति मन्त्रपुष्पाञ्जलिं समर्पयामि ततः प्रणमेत्।

एता जयारमाभक्त्यादिपूजिताः सन्तु पूजां गृह्णन्तु सुप्रसन्ना वरदा भवन्तु॥इति परिवारार्चनं कृत्वा

पुनः श्रीहरिकृष्णभगवन्तं गन्धादिभिः पूजयेयम्।

॥ अथ चन्दनम् ॥

सद्भिः प्रेमभरेण नित्यमनघैः स्वेच्छानुकूलं विभो

सर्वाङ्गेऽगरुचन्दनैः सुरभिभिर्ब्रह्मात्मभिः पूजितः।

कर्पुरागरुकेसरैर्मृगमदैः सम्मिश्रितं सुन्दरं,

कृष्ण त्वं शुभचन्दनं मलयजं गृह्णिष्व दत्तं मया॥७२॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः चन्दनं समर्पयामि।

अथ पुष्पाणि ॥ ફૂલ

जातीचम्पककर्णिकारकमलैः सन्मल्लिका यूथिका,
मन्दारस्थलपद्मकेतकमहाकुन्दैश्च पुन्नागजैः ।
पुष्पैर्दूषणवर्जितैर्बहु विधैस्त्वां पूजयामि प्रभो !
तानि त्वं सदयं गृहाण कुसुमालङ्कारधृच्छ्रीहरे ! ॥७३॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः पुष्पाणि समर्पयामि ।

अथ श्रीहरिकृष्णं सर्वमङ्गलोक्तैः जनमङ्गलोक्तैः वाष्ठोत्तरसहस्राष्टोत्तरशतनामभिः तुलसीदलैः पूजयेयम् ॥

(ભગવાનના ૧૦૮ નામથી પૂજન - ડાબા હાથમાં ચોખા )

ॐ श्रीकृष्णाय नमः
ॐ श्रीवासुदेवाय नमः
ॐ नरनारायणाय नमः
ॐ प्रभवे नमः
ॐ भक्तिधर्मात्मजाय नमः
ॐ अजन्मने नमः
ॐ कृष्णाय नमः
ॐ नारायणाय नमः
ॐ हरये नमः
ॐ हरिकृष्णाय नमः
ॐ घनश्यामाय नमः
ॐ धार्मिकाय नमः
ॐ भक्तिनन्दनाय नमः
ॐ बृहद्व्रतधराय नमः
ॐ शुद्धाय नमः
ॐ राधाकृष्णेष्टदैवताय नमः
ॐ मरुत्सुतप्रियाय नमः
ॐ कालीभैरवाद्यतिभीषणाय नमः
ॐ जितेन्द्रियाय नमः
ॐ जिताहाराय नमः
ॐ तीव्रवैराग्याय नमः
ॐ आस्तिकाय नमः
ॐ योगेश्वराय नमः
ॐ योगकलाप्रवृत्तये नमः
ॐ अतिधैर्यवते नमः
ॐ ज्ञानिने नमः

ॐ परमहंसाय नमः
ॐ तीर्थकृते नमः
ॐ तैर्थिकार्चिताय नमः
ॐ क्षमानिधये नमः
ॐ सदोन्निद्राय नमः
ॐ ध्याननिष्ठाय नमः
ॐ तपःप्रियाय नमः
ॐ सिद्धेश्वराय नमः
ॐ स्वतन्त्राय नमः
ॐ ब्रह्मविद्याप्रवर्तकाय नमः
ॐ पाषण्डोच्छेदनपटवे नमः
ॐ स्वस्वरूपाचलस्थितये नमः
ॐ प्रशान्तमूर्तये नमः
ॐ निर्दोषाय नमः
ॐ असुरगुर्वादिमोहनाय नमः
ॐ अतिकारुण्यनयनाय नमः
ॐ उद्धवाध्वप्रवर्तकाय नमः
ॐ महाव्रताय नमः
ॐ साधुशीलाय नमः
ॐ साधुविप्रप्रपूजकाय नमः
ॐ अहिंसयज्ञप्रस्तोत्रे नमः
ॐ साकारब्रह्मवर्णनाय नमः
ॐ स्वामिनारायण नमः
ॐ स्वामिने नमः
ॐ कालदोषनिवारकाय नमः

ॐ सच्छास्त्रव्यसनाय नमः
ॐ सद्यःसमाधिस्थितिकारकाय नमः
ॐ कृष्णार्चास्थापनकराय नमः
ॐ कौलद्विषे नमः
ॐ कलितारकाय नमः
ॐ प्रकाशरूपाय नमः
ॐ निर्दम्भाय नमः
ॐ सर्वजीवहितावहाय नमः
ॐ भक्तिसम्पोषकाय नमः
ॐ वाग्मिने नमः
ॐ चतुर्वर्गफलप्रदाय नमः
ॐ निर्मत्सराय नमः
ॐ भक्तवर्मणे नमः
ॐ बुद्धिदात्रे नमः
ॐ अतिपावनाय नमः
ॐ अबुद्धिहृते नमः
ॐ ब्रह्मधामदर्शकाय नमः
ॐ अपराजिताय नमः
ॐ आसमुद्रान्तसत्कीर्तये नमः
ॐ श्रितसंसृतिमोचनायनमः
ॐ उदारायनमः
ॐ सहजानन्दाय नमः
ॐ साध्वीधर्मप्रवर्तकाय नमः
ॐ कन्दर्पदर्पदलनाय नमः
ॐ वैष्णवक्रतुकारकाय नमः

ॐ पञ्चायतनसन्मानाय नमः

ॐ नैष्ठिकव्रतपोषकाय नमः

ॐ प्रगल्भाय नमः

ॐ निःस्पृहाय नमः

ॐ सत्यप्रतिज्ञाय नमः

ॐ भक्तवत्सलाय नमः

ॐ अरोषणाय नमः

ॐ दीर्घदर्शिने नमः

ॐ षडूर्मिविजयक्षमाय नमः

ॐ निरहङ्कृतये नमः

ॐ अद्रोहाय नमः

ॐ ऋजवे नमः

ॐ सर्वोपकारकाय नमः

ॐ नियामकाय नमः

ॐ उपशमस्थितये नमः

ॐ विनयवते नमः

ॐ गुरवे नमः

ॐ अजातवैरिणे नमः

ॐ निर्लोभाय नमः

ॐ महापुरुषाय नमः

ॐ आत्मदाय नमः

ॐ अखण्डितार्षमर्यादाय नमः

ॐ व्याससिद्धान्तबोधकाय नमः

ॐ मनोनिग्रहयुक्तिज्ञाय नमः

ॐ यमदूतविमोचकाय नमः

ॐ पूर्णकामाय नमः

ॐ सत्यवादिने नमः

ॐ गुणग्राहिणे नमः

ॐ गतस्मयाय नमः

ॐ सदाचारप्रियतराय नमः

ॐ पुण्यश्रवणकीर्तनाय नमः

ॐ सर्वमङ्गलसद्रूपनानागुणविचेष्टिताय नमः ॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः पुष्पाणि समर्पयामि ।

ફૂલનો હાર પહેરાવવો.

अथ धूपम् ॥ (અગરબતીનો ધૂપ)

यन्मूर्तौ सुरभि त्वमस्ति सहजं यादृङ्मनोरञ्जनं,
कस्मिंश्चिज्जगतीह नास्ति हि तथा लेशोऽपि तस्य क्वचित् ।
स त्वं कृष्ण दशाङ्गसंज्ञितमिमं धूपं सुगन्धिं हरे,
भक्त्या मेऽर्पितमुत्तमं हृदयगं घ्राणप्रियं स्वीकुरु ॥७९॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः धूपं समर्पयामि ।

अथ दीपम् । (દીવો)

सूर्याग्न्यत्रिसुतादयः सुरगणा यद्धाम्न एवाक्षरात्
तेजो लेशमवाप्य विश्वमखिलं ह्युद्भासयन्ति प्रभो ।
तद्धामाधिपतिस्त्वमेव भगवन् दीपं कृपाम्भोनिधे,
सामोदेन गवां घृतेन विहितं गृह्णीष्व वर्तिद्वयम् ॥८०॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः दीपं समर्पयामि ।

अथ नैवेद्यम् । (મોટો થાળ)

आधारे स्वर्णादिपात्रे भक्ष्यभोज्यलेह्यचोष्यात्मकमन्नं परिवेष्य मूलेनाभ्युक्ष्य :-

नैवेद्यं परमान्नसक्तुवटकान् संयावपूरीस्तथा
दौहित्रान् घृतपूरसूपसुखदाफेणिरसालोदनान् ।
रम्यां शष्कुलिकां बिरञ्जगुडकान् पूपान् सितान् पिण्डकान्
कृष्ण त्वं घृतशर्करादधिपयश्चेत्यादिकं स्वीकुरु ॥८१॥

अत्र धूपं, दीपं, नैवेद्यं, यथाकृतां पूजामिमामर्चिताम् अमृतस्वरूपेण यथा यथा विभागं वः स्वाहा, धेनुमुद्रां प्रदर्श्य, ग्रासमुद्रां च प्रदर्श्य । नैवेद्यार्पणयोग्यताप्राप्त्यार्थं न्यासः क्रियते ।

ડાબો હાથ મુખે આડો રાખી જમણા હાથે ભગવાનને જમાડવા.

तर्जनीमध्यमाङ्गुष्ठैः ॐ प्राणाय स्वाहा ॥
मध्यमाऽनामिकाङ्गुष्ठैः ॐ अपानाय स्वाहा ॥
अनामिकाकनिष्ठिकाङ्गुष्ठैः ॐ व्यानाय स्वाहा ॥
कनिष्ठिकाऽनामिकामध्यमाङ्गुष्ठैः ॐ उदानाय स्वाहा ॥
सर्वाङ्गुंलिभिः ॐ समानाय स्वाहा ॐ ब्रह्मणे स्वाहा ॥

## अथाष्टपदी ॥ અથવા જમો થાળ.

वृषकुलकमल रवे ( २ ) शनकैर्भगवँस्त्वं ( २ ) समय इह विहाय तु चपल
त्वं यद्रुचिकरमत्रयथेष्ट मधिरसमद्धि हरे । ध्रुवपदम्

कनकमयदिनकरोज्ज्वलपात्रभृताद्यं ( २ ) सरससुखकरोत्तमबहुखाद्यं
साज्यसुरभिसुन्दरकूर मधिरसमद्धि हरे वृषकुलकमलरवे ॥१॥

असुहितकरसघृतं परमान्नमपूपम् ( २ ) सदधिवटकमुत्तमरससूपं
शाष्कुलिकमिदं च रसाल मद्धिरसमद्धि हरे वृषकुलकमल रवे ॥२॥

मिलित नवघृतसितं कदलं मृदुपोलीं ( २ ) भवदभिमतफुल्लित सितपूरीं
शाटकदयितोदनपिष्ट मधिरसमद्धि हरे वृषकुलकमल रवे ॥३॥

अदनरुचिदचटनीं वटिकां घृतपाकं ( २ ) समजलधिज संस्कृतबहुशाकं
पिण्डकमुत्तममौक्तिकगोल मधिरसमद्धि हरे वृषकुलकमल रवे ॥४॥

स्थिरकगुडकसुखदाः ससितं दधिमण्डम् ( २ ) शशिनिभं सममिश्रितघृतखण्डं
मोदकमति चारु बिरञ्ज मधिरसमद्धि हरे वृषकुलकमल रवे ॥५॥

मरिचलवणजरणादियुतेऽद्धि रसाद्यं ( २ ) दधनिनिहितमोदन-मवसाद्यं
मा कुरु कवलं ह्यपि दूर मधिरसमद्धि हरे वृषकुलकमल रवे ॥६॥

करकमलनिकटगं ससितं नवनीतं ( २ ) विशदपृथुल-पर्पटमथ
शीतं स्वम्बु पिब सितोदनदुग्ध मधिरसमद्धि हरे वृषकुलकमल रवे ॥७॥

सुचि कुरु करकमलं वदनं मुखवासं ( २ ) तदनु सदयमाददस्व
निजदासं शिक्षय हृदि मे कुरु वास मधिरसमद्धि हरे वृषकुलकमल रवे ॥८॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः नैवेद्यं समर्पयामि ॥

જમો થાળ જીવન જાઉં વારી,
ધોઉં કર ચરણ કરો ત્યારી. જમો૦ ૧
બેસો મેલ્યા બાજોઠીયા ઢાળી, કટોરા કંચનની થાળી;
જળે ભર્યા ચંબુ ચોખાળી. જમો૦ ૨
કરી કાઠા ઘઉંની પોળી, મેલી ઘૃત સાકરમાં બોળી;
કાઢ્યો રસ કેરીનો ઘોળી. જમો૦ ૩
ગળ્યા સાટા ઘેબર ફૂલવડી, દૂધપાક માલપુવા કઢી;
પુરી પોંચી થઈ છે ઘીમાં ચઢી. જમો૦ ૪
અથાણાં શાક સુંદર ભાજી, લાવી છું તરત કરી તાજી;
દહીં ભાત સાકર છે ઝાઝી. જમો૦ ૫
ચળુ કરો લાવું જળ ઝારી, એલચી લવીંગ સોપારી;
પાન બીડી બનાવી સારી. જમો૦ ૬
મુખવાસ મનગમતા લઈને, પ્રસાદી થાળ તણી દઈને;
બેસો સિંહાસને રાજી થઈને. જમો૦ ૭
કમરે કસીને ફેટો, રાજેશ્વર ઓઢીને રેટો;
ભૂમાનંદના વાલા ભેટો. જમો૦ ૮

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः नैवेद्यं समर्पयामि ॥

अथाचमनीयम् ॥

गृह्णिष्वाचमनीयमुत्तमजलं स्वच्छं करोद्वर्तनं
कर्तुं तच्छुभचन्दनं सुरभिमत् कृष्ण त्वमङ्गीकुरु ।
पानार्थं च तथातिमिष्टममलं शीतञ्च प्रीत्यार्पितं
स्वप्रेष्टं नलदैः सुवासितमिदं भक्त्यात्मज स्वीकुरु ॥८३॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः नैवेद्यान्ते आचमनं समर्पयामि (પાંચ વખત પાણીની ચમચી)हस्तप्रक्षालनं समर्पयामि, मुखप्रक्षालनं समर्पयामि, करोद्वर्तनार्थे चन्दनं समर्पयामि, जलपानं समर्पयामि ॥

अथ ताम्बुलम् (પાનબીડું)

नित्यं ब्राह्मणसाधुपोषणरतः साङ्गात्मभक्तेर्द्रढं,
पन्थानं विदधन्मिताशनरतस्त्वं नागवल्लीदलम् ।

जातीपुष्पलवङ्गपूगखदिरैर्जातीफलैलासुधा,
त्वक्कर्पूरसमन्वितं हरिरिदं गृह्णिष्व दत्तं मया ॥८४॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः मुखवासार्थं ताम्बूलं समर्पयामि ॥

अथ फलम् ॥ (ફળ)

प्रेम्णा पूजितपादपल्लवयुगो राधारमाभ्यां सदा,
भूमौ भक्तसुखाय रम्यनगरे वृत्तालयाख्ये वसन् ।
कृष्णास्त्वं पनसाम्रपूगकदलीखर्जूरसीताफलं
नालिकेरफलं तथामृतफलं दिव्यं गृहाण प्रभो ! ॥८५॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः फलार्घ्यं समर्पयामि ॥

अथ दक्षिणा ॥ (સિક્કા)

ब्रह्मेन्द्रादिसुरैरनन्तभुवनाध्यक्षैर्निजं मस्तकं,
मुक्त्वा भूर्युपदाश्च पादकजयोः पीठेन तस्यानिशम् ।
पूजोनात्यतिरिक्तदोष हृतये तत्पूर्तये श्रीहरे !
स्वामिन्काञ्चन दक्षिणामहमिमां ते स्थापयाम्यग्रतः ॥८६॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः दक्षिणां समर्पयामि ॥

अथ पञ्चत्रीन् वा दीपान् सुवर्णादिपात्रे प्रज्वाल्य चन्दनादिना सम्पूज्य आरार्त्रिकं कुर्यात् ॥

(મહા આરતી પ્રગટાવી ચંદન, પુષ્પ, ચોખાથી તેનું પૂજન કરવું.)

शेषाद्यैर्विबुधैः प्रणामसमये स्वैः स्वैः शिरोभिः सदा
चञ्चत्स्वच्छकिरीटरत्नकिरणैर्नीराजिताङ्घ्रिद्वयः ।
कृष्णास्त्वं बहुवर्तिभिर्हृदयगं नीराजनं श्रीहरे
लोकानन्दकरः प्रकाशबहुलो दत्तं मया स्वीकुरु ॥८७॥

## अथ महा आरती ॥ અથવા જય સદ્‌ગુરુ સ્વામી.

जयदेव जयदेव । जय कल्मषहारिन् २
प्राप्यस्त्वं निजभक्तैः २ कृष्णः सुखकारिन् ।
भारं हर्तुमवन्या जातो वृषसदने २,
मुनिवृन्दस्य सुखाप्त्यै २ विचरंस्त्वं गहने ।
तैर्थिकजनतोद्धरणं हरिरकरोः कृपया २,
दितिजानीकमभद्रं २ क्षपयन् बहुयुक्त्या । जयदेव जयदेव ॥१॥
कुर्वन् मानुषनाट्यं सद्गुरुतो दीक्षां २,
गृह्णन्भागवतीं त्वं २ श्रुतवान् गुरुशिक्षाम् ।
गुरुणा स्थापित आसन उपविष्टस्तत्र २,
स्थापितवान् निजधर्मे २ निजशिष्यानत्र । जयदेव जयदेव ॥२॥
निजशिष्यैः सहितस्त्वं विचरन् भुवि भगवन् २,
साङ्गाया निजभक्तेः २ पुष्टिं बहु कुर्वन् ।
जनतान्तःकरणाद्वै धमयन्नज्ञानं २,
कृतवान् क्षीणमधर्मं २ प्रददत्स्वज्ञानम् । जयदेव जयदेव ॥३॥
निजदर्शनमात्रात् त्वं जनचित्तं कर्षन् २,
नानन्दं जनताया २ धर्मात्मज वर्षन् ।
गोलोकादिकधामसु निजमूर्तीर्भगवन् २,
नदीदृशः स्वैश्वर्यं २ करुणां बहु कुर्वन् । जयदेव जयदेव ॥४॥
प्राप्तानां निजशरणं सकलाशिवहारी २,
निजरतजनतासङ्ग २ प्राप्ताभयकारी ।
तव शरणं प्राप्तस्योद्धरणं मे शिवदं २,
कुर्वज्ञस्य भवाब्धेः २ पश्यन्निजबिरुदम् । जयदेव जयदेव ॥५॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः महानीराजनं समर्पयामि ॥

જય સદ્‌ગુરુ સ્વામી, પ્રભુ જય સદ્‌ગુરુ સ્વામી;
સહજાનંદ દયાળુ, બળવંત બહુનામી. પ્રભુ જય૦ ૧
ચરણ સરોજ તમારાં, વંદુ કર જોડી;
ચરણે શીશ ધર્યાથી, દુઃખ નાખ્યાં તોડી. જય૦ ૨
નારાયણ નર ભ્રાતા દ્વિજકુળ તનુ ધારી;
પામર પતિત ઉધાર્યા, અગણિત નરનારી. જય૦ ૩
નિત્ય નિત્ય નૌતમ લીલા, કરતા અવિનાશી;
અડસઠ તીરથ ચરણે, કોટી ગયા કાશી. જય૦ ૪
પુરુષોત્તમ પ્રગટનું, જે દર્શન કરશે;
કાળ કરમથી છુટી, કુટુંબ સહિત તરશે. જય૦ ૫
આ અવસર કરુણાનિધિ, કરુણા બહુ કીધી;
મુક્તાનંદ કહે મુક્તિ, સુગમ કરી સિધી. જય૦ ૬

(હાથમાં પુષ્પો લઈને ઉભા રહીને પ્રાર્થના બોલવી.)

॥ गुरु भजनस्तोत्रम् । वियोगिनीवृत्तम् ॥

भवसम्भवभीतिभेदनं सुखसम्पत्करुणानिकेतनम् ।
व्रतदानतपःक्रियाफलं, सहजानन्दगुरुं भजे सदा ॥१॥
करुणामयचारु लोचनं, शरणायातजनार्तिमोचनम् ।
पतितोद्धरणाय तत्परं, सहजानन्दगुरुं भजे सदा ॥२॥
निजतत्त्वपथावबोधनं, जनतायाः स्वत एव दुर्गमम् ।
इति चिन्त्य गृहीतविग्रहं, सहजानन्दगुरुं भजे सदा ॥३॥
विधिशम्भुमुखैरनिग्रहं, भवपाथोधिपरिभ्रमाकुलम् ।
अपिधार्य मनो नरप्रभं, सहजानन्दगुरुं भजे सदा ॥४॥
निजपादपयोजकीर्तनं, सततं स्याद्भवजीवगोचरम् ।
इति यः कुरु ते क्रतूत्सवं, सहजानन्दगुरुं भजे सदा ॥५॥
बहिरीक्षणलोकमानुषं, निजदत्ताम्बक दर्शिनां हरिम् ।
भजनीयपदं जगद्गुरुं , सहजानन्दगुरुं भजे सदा ॥६॥

शरणागतपापपर्वतं, गणयित्वा न तदीयसद्गुणम्।
अणुमप्यतुलं हि मन्यते, सहजानन्दगुरुं भजे सदा ॥७॥
भववारिधिमोक्षसाधनं, गुरु राजप्रकटस्वसङ्गमम् ।
प्रकटीकृतवान् कृपावशः, सहजानन्दगुरुं भजे सदा ॥८॥
भगवन् ! कृपया त्वया कृतं, जनतायामुपकारमीदृशम्।
क्षमते प्रतिकर्तुमत्र कः, कुरु ते दीनजनस्ततोंजलिम् ॥९॥

त्वमेव माता च पिता त्वमेव। त्वमेव बन्धुश्च सखा त्वमेव॥
त्वमेव विद्या द्रविणं त्वमेव। त्वमेव सर्वं मम देवदेव॥
निजाश्रितानां सकलार्तिहन्ता सधर्मभक्तेरवनं विधाता।
दाता सुखानां मनसेप्सितानां तनोतुकृष्णोऽखिलमङ्गलं नः॥
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥
नैकविश्वसमाधार ब्रह्मधामाधिप प्रभो।
मदञ्जलिस्थपुष्पाणि गृह्यतां पुरुषोत्तम॥

॥ वसन्ततिलकावृत्तम् ॥

श्री वासुदेव विमलामृतधामवासं, नारायणं नरकतारणनामधेयम् ।
श्यामं सितं द्विभुजमेव चतुर्भुजं च, त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥१॥
शिक्षार्थमत्र निजभक्तिमतां नराणामेकान्तधर्ममखिलं परिशीलयन्तम्।
अष्टाङ्गयोगकलनाश्च महाव्रतानि त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥२॥
श्वासेन साकमनुलोमविलोमवृत्त्या स्वान्तर्बहिश्च भगवत्युरुधा निजस्य।
पूरे गतागतजलाम्बुधिनोपमेयं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥३॥
बाह्यान्तरिन्द्रियगणश्वसनाधिदैव वृत्त्युद्भवस्थितिलयानपि जायमानान्।
स्थित्वा ततः स्वमहसापृथगीक्षमाणं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥४॥
मायामयाकृतितमोऽशुभवासनानां कर्तुं निषेधमुरुधा भगवत्स्वरूपे ।
नीर्बिजसाङ्ख्यमतयोगगयुक्तिभाजं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥५॥

दिव्याकृतित्वसुमहस्त्वसुवासनानां सम्यग्विधिं प्रथयितुं च पतौ रमायाः ।
सालम्बसाङ्ख्यपथयोगसुयुक्तिभाजं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥६॥
कामार्ततस्करनटव्यसनिद्विषन्तः स्वस्वार्थसिद्धिमिव चेतसि नित्यमेव ।
नारायणं परमयैव मुदा स्मरन्तं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥७॥
साध्वीचकोरसलभास्तिमिकालकण्ठकोका निजेष्टविषयेषु यथैव लग्नाः ।
मूर्त्तौ तथा भगवतोऽत्र मुदातिलग्नं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥८॥
स्नेहातुरस्त्वथ भयातुर आमयावी यद्वत्क्षुधातुरजनश्च विहायमानम् ।
दैन्यं भजेयुरिह सत्सु तथा चरन्तं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥९॥
धर्मस्थितैरुपगतैर्बृहता निजैक्यं सेव्यो हरिः सितमहःस्थितदिव्यमूर्तिः ।
शब्दाद्यरागिभिरिति स्वमतं वदन्तं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥१०॥
सद्ग्रन्थनित्यपठनश्रवणादिसक्तं ब्राह्मीं च सत्सदसि शासतमत्र विद्याम् ।
संसारजालपतिताखिलजीवबन्धो ! त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥११॥

વિશ્વેશ છો સકલ વિશ્વતણા વિધાતા,
ત્રાતા તમે સકલ મંગલ શાંતિ દાતા;
માટે તમારું કરુણાનિધિ સત્યનામ,
સાષ્ટાંગ નાથ તમને કરું હું પ્રણામ. ॥૧॥
અજ્ઞાન પાશ કરુણા કરી કાપી નાખો,
નિત્યે પ્રભુ તવ પદે મમ વૃત્તિ રાખો;
ભક્તોનું પાલન કરો પ્રભુ સર્વયામ,
સાષ્ટાંગ નાથ તમને કરું હું પ્રણામ. ॥૨॥

॥ अथ प्रदक्षिणा ॥

सावरणाण्डचया भ्रमन्ति विवरे रोम्णः सदा यस्य वै,
तेष्वण्डेषु च विभ्रतो ह्यगणिताँल्लीलावतारान् हरे ।
भक्ताघौघविनाशिनीः प्रतिपदं बध्वा करौ त्वन्मनाः,
कुर्वे नाथ ! परिक्रमा वृषजनेस्तेऽहं भवात्पाहि माम् ॥१२॥
साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः प्रदक्षिणां समर्पयामि ॥

॥ अथ नमस्कारान् ॥

दृग्वाणीमन उत्तमाङ्गचरणोरोजानुहस्तैरहं,
साष्टाङ्ग प्रणमाम्युतोक्षिकरवाक् स्वान्तोत्तमाङ्गैर्हरे ।
पञ्चाङ्गं शनकैर्यथार्थमवनौ त्वद्दक्षपार्श्वे मनाक्,
तुभ्यं त्वद्भवदीयपादरजसां निर्वेतनः किङ्करः ॥९३॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः नमस्कारान् समर्पयामि ॥

अथ मन्त्रपुष्पाञ्जलिः ॥

(હાથમાં પુષ્પ લઈ હાથ જોડી પ્રાર્થના)

ॐ राजाधिराजाय प्रसह्यकल्याणकारिणे नमो नारायणाय पावितात्मीयजनाय श्रीवासुदेवाय स्वाश्रितानन्तजन्मपापघ्ने वयं वै नमस्कुर्महे कृष्णाय भूयो हरिकृष्णाय नीलकण्ठाय नमो नमः

सत्त्वं कामान् कामकामाय मह्यं कामेश्वरः पुण्यपुत्रो दधातु देवाधिदेवाय वै श्रवणसम्पत् प्रदात्रे महाराजाय नमः

देहि साम्राज्य-भोज्य-स्वराज्य-पारमेष्ठ्य-राज्यादधिकं महाराज-महाधिपत्यं त्वदीयं मे दास्यं समुद्रपर्यन्तायाः सार्वभौमश्रियः

आद्विपरार्द्धायुर्विधिपदाप्तेरऽप्यधिकमेकराडाख्यं सत्यमेव त्वदाधिपत्यं मन्ये ब्रह्माण्डाधीशास्त्वदाप्तैश्वर्यास्तस्मान्नान्यत्त्वत्तः कामयामहे ।

तत्राप्येषः श्लोकोऽभिगीतः :-

देवाधिदेवः सर्वात्माऽक्षरधामाधिपः स्वयम् ।
तं स्तुवंस्तं नमस्कुर्वन् न भूयः कल्पतेऽध्वने ॥

ब्रह्माख्यैः पुरुषैश्च दिव्यतनुभि र्वेदैः सदा संस्तुतः,
शेषाद्यैरमरैः किरीटपटलै र्व्याघट्टिताङ्घ्र्यासनः ।
मन्वाद्यैश्च नराधिपैः सुगहनं गत्वा वनं चिन्तितो,
धार्मिस्त्वं च गृहाण पुष्पनिकरं दासाञ्जलिस्थं हरे ! ॥९४॥

साङ्गसपरिवारश्रीहरिकृष्णभगवते नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

## अथ राजोपचाराः ॥

मुक्तादामविभूषितं शशिनिभं छत्रं ह्युभे चामरे
चादर्शं व्यजनं दिवाकरमुखीं नृत्यं सुगीतं तथा ।
षट्त्रिंशद्विधवाद्यमुत्तममहं राजोपचारानिमान्
सर्वेशाय समर्पयामि हरये राजाधिराजाय ते ॥९५॥

साङ्गसपरिवार श्रीहरिकृष्णभगवते नमः ।( १ ) छत्रं,( २ ) चामरे,( ३ ) दर्पणं,( ४ ) व्यजनं,( ५ ) सूर्यमुखीं,( ६ ) नृत्यं,( ७ ) सुगीतं,( ८ )वाद्यम् इति अष्टराजोपचारान् समर्पयामि ॥

अथ श्रीहरिकृष्णभगवत्पूजनं साङ्गतासिध्यर्थं त्रयोदशाक्षरमन्त्रजपमहं करिष्ये इति सङ्कल्पः ॥ પાણીની આચમની મૂકજો.

अस्य श्रीत्रयोदशाक्षरमन्त्रस्य अखण्डानन्द ऋषिः, गायत्री छन्दः, अवतारि श्रीहरिकृष्णभगवद्देवता, धर्मपुत्र इति बीजम्, नैष्ठिकव्रतधर इति शक्तिः, भक्तिप्रवर्तक इति कीलकम्, भगवत् श्रीस्वामिनारायणप्रीत्यर्थे जपे विनियोगः ॥ ન્યાસ કરજો.

ॐ अखण्डान्दऋषये नमः शिरसि
ॐ गायत्रीछन्दसे नमो मुखे
ॐ अवतारिश्रीहरिकृष्णभगवद्देवतायै नमः हृदये
ॐ धर्मपुत्र इति बीजाय नमो नाभौ
ॐ नैष्ठिकव्रतधर इति शक्तये नमो बाहुभ्याम्
ॐ भक्तिप्रवर्तक इति कीलकाय नमः सर्वाङ्गे
ॐ नमो हृदयाय नमः
ॐ अवतारिणे शिरसे स्वाहा
ॐ स्वामिनारायणाय शिखायै वषट्
ॐ नमो कवचाय हुम्
ॐ अवतारिणे नेत्राभ्यां वौषट्
ॐ स्वामिनारायणाय अस्त्राय फट्

॥ अथ ध्यानम् ॥ (ભગવાનનું ધ્યાન કરવાનું)

श्रीमच्छारदपूर्णचन्द्रविलसत्स्मेराननं श्रीहरिं,
तुङ्गे पीठवरे स्थितं परिवृतं सद्भक्तवृन्दैर्यथा ।
ताराभिर्विधुमर्च्यमानमुरुधा तैश्चन्दनैः कौसमै-
र्हारैः शेखरपंक्तिभिश्च हृदये शुक्लाम्बरं चिन्तये ॥१॥

इति ध्यात्वा स्वहृदयसमीपे मालामानीय मध्यमाङ्गुलिमध्यपर्वणि अव्यग्रमनसा अष्टोत्तरसहस्त्रमष्टोत्तरशतं वा जप्त्वा

(હાથમાં માળા લઈને હૃદય સમીપે રાખી "નમોડવતારીણે સ્વામિનારાયણ" મંત્રની માળા ફેરવવી.)

पुनः षडङ्गन्यासान् कृत्वा ન્યાસ કરવા.

ॐ अखण्डान्दऋषये नमः शिरसि
ॐ गायत्रीछन्दसे नमो मुखे
ॐ अवतारिश्रीहरिकृष्णभगवद्देवतायै नमः हृदये
ॐ धर्मपुत्र इति बीजाय नमो नाभौ
ॐ नैष्ठिकव्रतधर इति शक्तये नमो बाहुभ्याम्
ॐ भक्तिप्रवर्तक इति कीलकाय नमः सर्वाङ्गे
ॐ नमो हृदयाय नमः
ॐ अवतारिणे शिरसे स्वाहा
ॐ स्वामिनारायणाय शिखायै वषट्
ॐ नमो कवचाय हुम्
ॐ अवतारिणे नेत्राभ्यां वौषट्
ॐ स्वामिनारायणाय अस्त्राय फट्

अनेन मन्त्रजपकृतेन श्रीहरिकृष्णभगवान् प्रीयताम् ॥

(મહાપૂજામાં કંઈ ભુલચુક થઈ હોય તેની બે હાથ જોડી ક્ષમા પ્રાર્થના.)

બે હાથ જોડી રાખજો.

## अथ प्रार्थना ॥

हे निलकंठ ! शरणागत जीवपालं
संसारसिन्धुपतितोद्धरणैककृत्यम् ।
स्वानां सुखं वितरितुं धृतनैकरूपं
प्राप्तोऽस्मि भक्तितनयं शरणं हरिं त्वाम् ॥१॥

स्वामिन् सदाऽतिकरुणार्द्रविलोचनाब्जं
स्वातिप्रियोद्धवमताब्जविकाशनार्कम् ।
पाखण्डखण्डनपटुं स्वजनार्द्रचित्तं,
प्राप्तोऽस्मि भक्तितनयं शरणं हरिं त्वाम् ॥२॥

मुक्तिप्रदं भवभयार्त्तजनस्य बन्धुं
धर्माढ्यभक्तिपथपोषणतत्परञ्च ।
भक्तप्रियं सुरनराधिप वन्द्यपादं
प्राप्तोऽस्मि भक्तितनयं शरणं हरिं त्वाम् ॥३॥

नारायणं धृतमनोहरवर्णिवेषं
धर्मञ्च नैष्ठिकमिह प्रथयन्तमाद्यम् ।
तापत्रयाभिभवकारिगुणानुवादं
प्राप्तोऽस्मि भक्तितनयं शरणं हरिं त्वाम् ॥४॥

शर्मप्रदातुमवनौ स्वसतामभद्रं
हन्तुञ्च तत्प्रतिपदुष्टजनान् सदीशम् ।
भक्तौ वृषाद्धृतशुभाङ्गमजं रमेशं
प्राप्तोऽस्मि भक्तितनयं शरणं हरिं त्वाम् ॥५॥

यस्येक्षणस्मरणकीर्त्तनवन्दनानि
प्रीत्यार्हणं श्रवणमाशु हरन्ति पापम् ।
मोक्षं दिशन्ति भवपाशनिबन्धनात्तं
प्राप्तोऽस्मि भक्तितनयं शरणं हरिं त्वाम् ॥६॥

यस्याश्रयादवरजन्तुरपि स्वपापं
हित्वाऽप्यदेववरणीयमथ स्वरूपम् ।
एत्यक्षरे निवसनं तमतीत्य विघ्नान्
प्राप्तोऽस्मि भक्तितनयं शरणं हरिं त्वाम् ॥७॥
दीनानुकम्पिनमरं शरणागताद्य स्तोमं
गुणज्ञ न गणय्य गुणं तदीयम् ।
अप्यल्पमीश शुभगं बहुमन्यमानं
प्राप्तोऽस्मि भक्तितनयं शरणं हरिं त्वाम् ॥८॥
संसारसिन्धुपतितस्य निजाघतः स्व-
प्रारब्धकर्म परिभुक्तवतोऽल्पबुद्धेः ।
वीक्ष्य स्वयं स्वबिरुदं कुरु मे भवाब्धे
रुद्धारमार्तिहरणं प्रणमाम्यहं त्वाम् ॥९॥
इति सम्प्रार्थ्य प्रणमेत् ॥

अथ सर्वाङ्गदेवानां हरेः प्रासादिकैर्द्विजः ।
पूजां तैस्तैः पदार्थैः स कुर्यात्प्रेम्णैव पूजकः ॥१०॥
इति स्तुत्वा पुनर्नत्वा भगवन्तमधोक्षजम् ।
मन्त्रेणानेन तं स्वीये हृदि प्रेम्णा विसर्जयेत् ॥११॥
अथ विसर्जनम् ॥ (જમણા હાથમાં ચપટી ચોખા લેવા.)
श्रद्धापूर्वमनेन चारु विधिना शश्वन्महापूजनं
स्वस्यैवाचरते स्वधर्मरतये भक्ताय सर्वात्मना ।
दिव्यं भूरि तदीप्सितं प्रददतं सर्वोत्तमं सत्सुखं
त्वामात्मेश विसर्जयामि हृदि मे सर्वाङ्गदेवैः सह ॥१२॥
इति अनेन हृत्पद्मकर्णिकामध्ये मदात्मनि सपरिवार श्रीहरिकृष्णभगवान् सदा वसतु ।इति विसर्जनम् ॥ (ચોખા મુકી દેવા.)

(સમાપ્તિનો સંકલ્પ - જમણા હાથમાં પાણી, ચંદન, ચોખા અને પુષ્પ લેવાં.)

ॐ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके जम्बुद्विपे भारतवर्षे आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे कुमारिकानाम्निक्षेत्रे કચ્છ દેશે ભુજંગનગરે હમીરસરદક્ષિણતટે સ્વામિનારાયણ મંદિરે દેવ-બ્રાહ્મણ-સાધ્વાદિનાં सन्निधौ अत्राद्य महामाङ्गल्यप्रदे विक्रमसंवत् દ્વિસહસ્ત્રાબ્દિકે .................... અબ્દે ( उतरायणे/दक्षिणायने ) गते श्रीमन्मार्तण्ड मण्डले मासोत्तममासे कार्तिकः मासे ( शुक्ल/कृष्ण ) पक्षे इन्दु वासरेः एकादशी तिथौ शुभनक्षत्रे शुभयोगे शुभकरणे शुभलग्ने शुभराशिस्थिते श्रीसूर्ये शुभराशिस्थिते श्रीचन्द्रे शेषेषु ग्रहेषु यथाराशिवर्तमानेषु सत्सु एवं ग्रहगणागुणाविशेषणाविशिष्टायां शुभपुण्यतिथौ मम एकान्तिकधर्मसिद्धये चेप्सितफलप्राप्त्यर्थं साङ्गसपरिवार श्रीहरिकृष्णभगवत् आवाहनादि यथामिलितोपचारेण महापूजनकृतेन श्रीहरिकृष्णभगवान् प्रीयताम् ॥

(સંકલ્પના પાણી, ચંદન, ચોખા, પુષ્પ મુકી દેવાં.)

श्रीहरिकृष्णभगवत् पूजनसम्पूर्णतासिद्धये श्रीमदौद्धवीय सम्प्रदायाचार्यादि ब्राह्मणान् वर्णिमुनिविप्रभक्ताँश्च यथाशक्त्या गन्धपुष्पवस्त्रादिना पूजयित्वा तान् यथा प्राप्तमन्नेन भोजयित्वा नत्वा वा ।

इति विसर्जनं कृत्वा, मूर्तिं संस्थाप्य मन्दिरे ।
स भक्त्या नवधा तस्य, शेषं निर्गमयेद्दिनम् ॥

य एतां भक्त्यैव प्रकट सहजानन्दभगवन्
महापूजां कुर्याद्विधिवदखिलां भक्तिनिरतः ।
स तद्धामप्राप्योत्तमनिजमनोवाञ्छितसुख
मियात्तस्मिन्नस्याः श्रवणनिरतोऽपीच्छितफलम् ॥

॥ इति महापूजा समाप्ता ॥

શ્રી સહજાનંદ સ્વામી મહારાજની જય

# अथ पुराणोक्तविधिना यज्ञोपवीतधारणविधिर्लिख्यते ॥

आचम्य प्राणानायम्य संकल्पः- अद्येत्यादि मम श्रौत-स्मार्त-कर्मानुष्ठान-सिद्ध्यर्थं तथा च अमुककर्माङ्गत्वेन विहितं नूतनयज्ञोपवीतधारणमहं करिष्ये इति सकल्पं

कृत्वा तत्रादौ सूत्रत्रिगुणीकरणम् तत्र मन्त्रः नारायणाय नमः इत्यनेन प्रक्षालनं विधाय पुनरपि दशभिर्विष्णुनाममन्त्रैर्मार्जनं कुर्यात्। तत्पश्चात् तन्तुदेवानां चावाहनं कुर्यात्।

शार्दूलवि० :- श्रीजुष्टे वटपत्तने नृपपथे भूपस्य हर्म्याङ्गणे
नागेन्दोपरिरुढमीडीतपदं भूपेन भक्त्या भृशम्।
नानारत्नमणीन्द्रमोक्तिकलितं हेमोद्भवं भूषणं
मूर्धाग्रे दधतं नमामि रुचिरं श्रीस्वामिनारायणम् ॥१॥

प्रथमतन्तौ ॐ श्रीस्वामिनारायणाय नमः श्रीस्वामिनारायणम् आह्वयामि स्थापयामि ( पूजयामि ) ॥

वसन्ततिलका :- उदामदामरचितं शुभमूलिपूर्याम्,
तद्वच्छुपयसि पुरेऽप्यकरोन्नवीनम्।
प्रेम्णा प्रबोध्य जनतां जगदीशधामाऽ
योध्याप्रसादमति नौमि पुरु मुनीनाम् ॥२॥

ॐ द्वितीयतन्तौ श्रीदेशिकेन्द्राय अयोध्याप्रसादाय नमः अयोध्याप्रसादमा० स्था० ( पू० ) ॥२॥

शिखरिणी :- जनानामाप्तानां स्वमिह शरणं स्थापनतया
हरेरैकान्तिक्यं जगति ननु भक्तौ वृषभवः।
हरिर्यस्मिन् प्रीतः स भृशमभवत्तं शुभगुणं
नमाम्याचार्येन्दुं मम हिरघुवीरं गुरुमहम् ॥३॥

ॐ तृतीयतन्तौ श्रीदेशिकेन्द्राय रघुवीराय नमः आ०स्था० ( पू० ) ॥३॥

शिखरिणी :- अजस्त्रं सम्प्राप्तं परमसहजानन्दनिकटे
स्थितिं तत्सेवायां निपुणमनवद्यं मतिमताम् ।
सतां चाद्यं वन्दे सदयहृदयं नैष्ठिकवरं
मुकुन्दानन्दाख्यं धृतशुभगुणाकल्पमनिशम् ॥४॥

ॐ चतुर्थतन्तौ मुकुन्दानन्दवर्णिने नमः मुकुन्दानन्दवर्णिनम् आ० स्था० ( पू० ) ॥४॥

प्रहर्षणी :- शास्त्रज्ञं वयुन विरक्तिभक्तियुक्तं,
सद्वन्द्यं मुकुटमणिं बृहद्व्रतानाम् ।
वन्देऽहं कविवरमत्रवासुदेवा,
नन्दाख्यं विनयदयाक्षमाद्युपेतम् ॥५॥

ॐ पञ्चमतन्तौ श्रीवासुदेवानन्दवर्णिने नमः वासुदेवानन्दवर्णिनमा० स्था० ( पू० ) ॥५॥

स्त्रग्धरा :-श्रीमद्धर्माङ्गजाताङ्घ्रीकमलयुगले भृङ्गराजं मनोज्ञं
वैराग्योत्कृष्टवेगोज्झितविषयविषाम्भोधि मिथ्यानुरागम् ।
स्वान्तर्बाह्येव नित्यं वृषकुलजलजाहस्करं वीक्ष्यमाणं
गोपालानन्दसंज्ञं मुनिवरमनघं योगिराजं नमामि ॥६॥

ॐ षष्ठतन्तौ गोपालानन्दमुनिने नमः गोपालानन्दमुनिमा० स्था० ( पू० ) ॥६॥

शार्दूल वि० :- नानापद्यसुकाव्यशीघ्ररचना दक्षं स्वधर्मस्थिरं
छन्दोभिः सुकृतैर्हरिं वृषभुवं सम्प्रीणयामास यः ।
मैत्रीं तेन गतः स्वनर्मवचनैः संहासयन्तं स्थिरं
ब्रह्मानन्दमुनिं नमामि तमहं देशाद्यभिज्ञं मुदा ॥७॥

ॐ सप्तमतन्तौ ब्रह्मानन्दमुनिने नमः ब्रह्मानन्दमुनिमा० स्था० ( पू० ) ॥७॥

शार्दूल वि० :- प्राप्तोवासमहर्निशं च सहजानन्दस्य यः सन्निधौ
प्रीत्या तं समतोषयद्यतिपतिः भक्त्यानुवृत्याभृशम् ।
वैराग्योज्झितसर्वलोकविभवं चैकान्तधर्मप्रियं
वन्दे तं विदुषांवरं शुकमुनिं शान्तस्वभावं सदा ॥८॥

ॐ अष्टमतन्तौ श्रीशुकानन्दमुनये नमः शुकानन्दमुनिमा० स्था० ( पू० ) ॥८॥

स्रग्धरा :- चक्रे नित्यं कथा यः प्रकटभगवतः सन्निधाने मनोज्ञां
यस्मै प्रादात् प्रसन्नो निजधृतवसनादीन्यसौ पूर्णकामः ।
जेता यः पण्डितानां जगति विवदतां देवताचार्यभक्तं
नित्यानन्दं मुनीन्द्रं तमनुदिनमहं नौमि भक्तिप्रधानम् ॥९॥

ॐ नवमतन्तौ श्रीनित्यानन्दमुनये नमः नित्यानन्दमुनिमा० स्था० ( पू० ) ॥९॥

ततो यज्ञोपवीतग्रन्थिदेवतानामवाहनं कुर्यात् ।

शार्दुल० :- श्रीमद्धर्मधुरंधरं सुखकरं कारुण्य पाथोनिधिं
सन्नाथं निगमान्तगीतयशसं पाथोदनील प्रभम् ।
धर्मस्वीकृतभूषणं स्वमहसा धर्मात्मजं स्वामिनं
सद्धाम्नः परमक्षरस्य सहजानन्दं हरिं तं भजे ॥१॥

ॐ ग्रन्थिमध्ये श्रीसहजानन्दस्वामिने नमः ॥१॥ श्रीसहजानदस्वामिनमा० स्था० ( पू० ) ॥१॥

वसन्ततिलका :-

श्रीमन्नवीनजलजासितसुन्दराङ्गं रत्नाङ्गुलीयवलयाङ्गदहस्तयुग्मम् ।
मन्दारकुन्दसुरभिस्थलपद्महारं वन्दे विशुद्धहरिकृष्णमहं सदीशम् ॥२॥

ॐ ग्रन्थिमध्ये श्रीहरिकृष्णाय नमः श्रीहरिकृष्णमा० स्था० ( पू० ) ॥२॥

शार्दूलः- रक्षन् वेदममन्दमन्दरगिरिं बिभ्रद्धरामाहरन्
प्रह्लादं परिपालयन् बलिमनः क्षुभ्यन् क्षयन् क्षत्रियान् ।
लङ्केशान्तकरश्च कंसशमनः शान्तोऽसुरोन्मोहनः
म्लेच्छोन्मूलनकारकस्तमनिशं श्रीनीलकण्ठं भजे ॥३॥

ॐ ग्रन्थिमध्ये श्रीनीलकण्ठाय नमः श्रीनीलकण्ठमा० स्था० ( पू० ) ॥३॥

श्रीनरनारायणाद्यावाहितदेवेभ्यो नमः यथास्थानमहं न्यसामि । ततो मानसोपचारैः संपूज्य ध्यानं कुर्यात् ।

उपजातिः– प्रजापतेर्यत्सहजं पवित्रं कार्पाससूत्रोद्भवब्रह्मसूत्रम् ।

ब्रह्मत्वसिद्ध्यै च यशः प्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्र ! ॥१॥

अथ यज्ञोपवीतधारणम् ॥

ॐ यज्ञोपवीतमिति मन्त्रस्य नारायण ऋषिः त्रिष्टुप् छन्दः भक्तिधर्मनन्दनः श्रीहरिर्देवता यज्ञोपवीतधारणे विनियोगः

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।

आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥१॥

ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतत्वेनोपनह्यामि अनेन मन्त्रेण पृथक् पृथक् यज्ञोपवीतधारणम् ।

आद्यन्तयोराचमनञ्च कृत्वा जीर्णसूत्रत्यागः

एतावदिनपर्यन्तं ब्रह्मत्वं धारितं मया ।

जीर्णत्वात् त्वत् परित्यागो गच्छ सूत्र यथासुखम् ॥

अनेन मन्त्रेण जीर्णं यज्ञोपवितं शिरोमार्गेण पृथक् पृथक् निसार्य शुद्धभूमौ त्यक्त्वा यथाशक्ति भगवन्नाममन्त्रजादिकञ्च कृत्वा समर्पणं कुर्यात् ।

अनेन नूतनयज्ञोपवीतधारणाख्यकर्मकृतेन यथाशक्ति श्रीभगवन्नाममन्त्रजापादि कर्मणा श्रीपरमेश्वरः प्रीयतां न मम ।

श्रीरस्तु शुभमस्तु ॥

इति यज्ञोपवितधारणविधिः संपूर्णः

૧૨ - મહિના:-

૧. કારતક - कार्तिकः, ૨. માગસર - मार्गशीर्षः, ૩. પોષ - पौषः, ૪. મહા - माघः, ૫. ફાગણ - फाल्गुनः, ૬. ચૈત્ર - चैत्रः, ૭. વૈશાખ - वैशाखः, ૮. જેઠ - ज्यैष्ठः, ૯. અષાઢ - आषाढः, ૧૦. શ્રાવણ - श्रावणः, ૧૧. ભાદરવો - भाद्रपदः, ૧૨. આસો - आश्विनः

---

૭ - દિવસ :-

૧. સોમવાર - सोमवासरः, ૨. મંગળવાર - मङ्गलवासरः, ૩. બુધવાર - बुधवासरः, ૪. ગુરુવાર - गुरुवासरः, बृहस्पतिवासरः, ૫. શુક્રવાર - शुक्रवासरः, ૬. શનિવાર - शनिवासरः, ૭. રવિવાર - रविवासरः, भानुवासरः

---

૧૨ રાશિ :-

१-सिंह, २-कन्या, ३-तुला, ४-वृश्चिक, ५-धनु, ६-मकर, ७-कुम्भ, ८-मीन, ९-मेष, १०-वृषभ, ११-मिथुन, १२-कर्क

---

તિથિ :-

१-प्रतिपदा, २-द्वितीया, ३-तृतीया, ४-चतुर्थी, ५-पञ्चमी, ६-षष्ठी, ७-सप्तमी, ८-अष्टमी, ९-नवमी, १०-दशमी, ११-एकादशी, १२-द्वादशी, १३-त्रयोदशी, १४-चतुर्दशी, १५-पूर्णिमा, ३०-अमावास्या।

---

૨૭ નક્ષત્ર :-

१-अश्विनि, २-भरणी, ३-कृतिका, ४-रोहिणी, ५-मृगशीर्षा, ६-आर्द्रा, ७-पुनर्वसु, ८-पुष्य, ९-आश्लेषा, १०-मघा, ११-पूर्वा फाल्गुनी, १२-उतरा फाल्गुनी, १३-हस्त, १४-चित्रा, १५-स्वाति, १६-विशाखा, १७-अनुराधा १८-ज्येष्ठा, १९-मूल, २०-पूर्वाषाढा, २१-उतराषाढा, २२-श्रवण, २३-धनिष्ठा, २४-शतभिषा, २५-पूर्वभाद्र, २६-उतरभाद्र, २७-रेवती।

## ૨૭ યોગ :-

१-विष्कुम्भ, २-प्रीति, ३-आयुष्मान, ४-सौभाग्य, ५-शोभन, ६-अतिगण्ड, ७-सुकर्मा, ८-धृति, ९-शूल, १०-गण्ड, ११-वृद्धि, १२-ध्रुव, १३-व्याघात, १४-हर्षण, १५-वज्र, १६-सिद्धि, १७-व्यातीपात, १८-वरीयान, १९-परिघ, २०-शिव, २१-सिद्ध, २२-साध्य, २३-शुभ, २४-शुक्ल, २५-ब्रह्म, २६-इन्द्र, २७-वैधृति ॥

---

## ૧૧ કરણ :-

१-बव, २-बालव, ३-कौलव, ४-तैतिल, ५-गर, ६-वणिज, ७-विष्टि, ८-शकुनि, ९-चतुष्पाद, १०-नाग, ११-किस्तुघ्न ॥

---

## મહાપૂજામાં ઉપયોગી વસ્તુઓ.

| | | |
|---|---|---|
| ૧૧૬ - સોપારી | છુટાં ફુલ | તુલસી પત્રો |
| ૧૧ - પાનબીડાં | ચોખા | કુંકુમ |
| ૮ - નાની આરતી-ફૂલવાટું | ગુલાલ | અબીર |
| ૧ - મોટી આરતી | સિન્દુર | હળદર |
| ૯ — દક્ષિણા-સિક્કા | ચંદન | અત્તર |
| ૫ - નાળિયેર | છબર-ધરો | ઘંટા |
| ૨ - ફુલના હાર | અગરબતી | દીવો-બાકસ |
| ૨ - યજ્ઞોપવીત | દૂધ | દહીં |
| ૧૧ - ફળ | ઘી | સાકર |
| ૯ - નૈવેદ્ય | મધ | પંચામૃત |
| ૧ - વાટકો સાકરવાળું દહીં (જમાડવા) | | આસન બેસવા માટે |
| થાળી-વાટકા-કળશિયા-ચમચી | | |
| નેપકીન | | |




## શ્રી સ્વામિનારાયણ મંદિર ભુજ આયોજીત
## અ.નિ. જ્યોતિષજ્ઞ સ.ગુ. પુરાણી સ્વામી કેશવપ્રસાદદાસજીના
## સર્વમંગલ સ્મૃતિ મહોત્સવ પ્રસંગે

**આર્થિક સહયોગ**

પ્રેરણા : સ.ગુ. પુ. સ્વામી કેશવજીવનદાસજી
સ.ગુ. પુ. સ્વામી માધવપ્રસાદદાસજી

**સમસ્ત હરિભક્તો તરફથી....**

ॐ

श्री स्वामिनारायण मंदिर भुज - कच्छ

धर्म श्री भक्ति

श्री स्वामिनारायणो विजयतेतराम्

